**i. कर्ता-क्रिया-अन्वय-** कर्तृवाच्य के वाक्य में कर्ता के वचन, पुरुष और लिंग के अनुसार क्रिया-पद रखा जाता है। कर्तृवाच्य के वाक्य का कर्ता प्रथमान्त होता है अर्थात् कर्ता में प्रथमा विभक्ति लगायी जाती है। कर्ता के वचन, पुरुष एवं लिंग का स्पष्ट प्रभाव क्रिया पर दृष्टिगोचर होता है। जैसे-

**कर्ता के वचन-**

(i) माधव: पुस्तकम् अपठत् । (ii)छात्रौ पुस्तकम् अपठताम् ।
(iii) **छात्राः** पुस्तकम् अपठन् । (iv) आवां पुस्तकम् अपठाव ।
(v) वयं पुस्तकम् अपठाम। (vi) त्वं पुस्तकम् अपठः ।
(vii) यूयं पुस्तकम् अपठत।

कर्ता के पुरुष-
(i)क्षेमेन्द्रः फलम् खादति । (ii)वानराः तीव्रम् धावन्ति ।
(iii) युवां नित्यम् पठथः । (iv) यूयं नित्यम् पठथ ।
(v) अहं विद्यालयम् गच्छामि। (vi) वयं विद्यालयम् गच्छामः।
कर्ता के लिंग-
(i) रमा पुस्तकालये पुस्तकम् पठितवती।
(ii) रविः पुस्तकालये पुस्तकम् पठितवान्।
(iii) सः सायं गृहम् गतवान् ।
(iv) सा सायं गृहम् गतवती ।
(v) छात्रः विद्यालयात् गृहम् आगतः।
(vi) छात्रा विद्यालयात् गृहम् आगता।

# खंड – घ (पठित अवबोधनम्)

## गद्यांशाः

**अधोलिखितान् गद्यांशानां पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत । (निम्नलिखित गद्यांशों को पढ़कर उनपर आधारित प्रश्नों के उत्तर लिखिए।)**

**(1) अस्ति देउलाख्यो ग्रामः । तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता । मार्गे गहनकानने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्य जगाद - "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते ।"**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) बुद्धिमती कुत्र एकं व्याघ्रं दृष्टवती ?
(ii) का पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ?
(iii) ग्रामस्य नाम किमस्ति ?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)
(i) बुद्धिमती पुत्रौ चपेटया प्रहृत्य किम् जगाद ?
(ii) राजसिंहः कुत्र वसति स्म ?
(iii) एकदा तस्य भार्या किं प्रति चलिता ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'अस्ति देउलाख्यो ग्रामः' अत्र क्रिया पदं किम् अस्ति ?
(ii) 'एकं व्याघ्रं ददर्श' अस्मिन् वाक्ये विशेष्य पदं किम् अस्ति ?
(iii) 'आगच्छन्तम्' इति क्रियापदस्य विपर्यय पदं गद्यांशे किम् ?

**(2) कश्चित् कृषकः बलीवर्दाभ्याम् क्षेत्रकर्षणं कुर्वन्नासीत् । तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात । क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषभः नोत्थितः । भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन् । सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्-अयि शुभे! किमेवं रोदिषि ?" सा च "भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि । सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति । सः कृच्छ्रेण भारमुद्वहति । इतरमिव धुरं वोढुं सः न शक्नोति । एतत् भवान् पश्यति न ?" इति प्रत्यवोचत्**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) कः क्षेत्रे अपतत् ?
(ii) सुरभिः कासां माता आसीत् ?
(iii) कृषकः कं बहुधा पीडयति स्म ?

II. पूर्णवाक्येन उत्तरत। (पूर्णवाक्य में उत्तर दीजिए।)
(i) सुरभिः किमर्थं रोदिति स्म ?
(ii) पतितं वृषभम् उत्थापयितुं कः प्रायतत ?
(iii) सुराधिपः काम् अपृच्छत् ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)

(i) 'मातुः सुरभेः नेत्राभ्याम् अश्रूणि आविरासन्' इत्यस्मिन् वाक्ये कर्तृपदं किम् ?
(ii) 'कृषीवलः' इति पदस्य किं विशेषणपदं प्रयुक्तम् ?
(iii) 'तीव्रगत्या' इत्यस्य किं पर्यायपदं प्रयुक्तम् ?

**(3) "बहून्यपत्यानि मे सन्तीति सत्यम् । तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः । सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति । सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्व्यत्" गच्छ वत्से! सर्वं भद्रं जायेत।" अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत । पश्यतः एव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षतिरेकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात् ।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) कस्मिन् सुते मातुः अभ्यधिका कृपा भवति ?
(ii) पश्यतः एव सर्वत्र किम् सञ्जातः ?
(iii) पश्यताम् एव सर्वत्र किं सञ्जातः ?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)
(i) सुरभिवयनं श्रुत्वा इंद्रः किम् अवदत् ?
(ii) वृषभौ नीत्वा कः गृहमागत् ?
(iii) सा पुत्रस्य प्रति कीदृशं प्रेम करोति?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'कल्याणं' पदस्य पर्याय पदं गद्यांशे किम् अस्ति ?
(ii) 'दुर्बले सुते' अत्र विशेष्य पदं गद्यांशे किम् अस्ति ?
(iii) 'विशिष्य' इति पदस्य कः प्रत्ययः ?

**(4) कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । तत्तनयः तत्रैव छात्रावासे निवसन् ध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः । परमर्थकाश्येन पीड़ितः स बसयानं विहाय पदातिरेव प्राचलत् । पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। 'निशांधकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः । करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) निर्धनजनः कथं वित्तम् उपार्जितवान् ?
(ii) तत्तनयः छात्रावासे निवसन् कस्मिन् संलग्नः सम्भूत् ?
(iii) केन पीड़ितः निर्धनः जनः पदातिः एव प्राचलत् ?

II. पूर्णवाक्येन उत्तरत। (पूर्णवाक्य में उत्तर दीजिए।)
(i) जनः किमर्थं पदातिः प्राचलत् ?
(ii) निशान्धकारे प्रसृते सः किम् अचिन्तयत् ?
(iii) पिता किमर्थं व्याकुलः जातः ?

III. निर्देशानुसारम् उत्तरत (निर्देशानुसार उत्तर दीजिए।)
(i) 'पुत्रः' इति पदस्य पर्याय पदं गद्यांशे किं प्रयुक्तम् ?
(ii) 'करुणापरो गृही तस्मै आश्रयं.... । अत्र 'तस्मै' सर्वनाम पदं कस्मै प्रयुक्तम् ?

(iii) 'तनयः' इति कर्तृपदस्य क्रियापदं किम् ?

**(5) विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धौऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति । तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एवं चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत् ।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) दैवगतिः कीदृशी ?
(ii) गृहाभ्यान्तरं कः प्रविष्टः ?
(iii) वस्तुतः चौरः कः आसीत् ?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)
(i) यद्यपि कः चौरः आसीत् ?
(ii) ग्रामवासिनः कम् चौरं मत्वाऽभर्त्सयन् ?
(iii) निहिताम् मञ्जूषाम् आदाय कः पलायितः ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'प्रबुद्धः अतिथिः' इत्यनयोः पदयोः विशेष्य पदं किम् ?
(ii) 'नीच्चैः' इति पदस्य विलोम पदं गद्यांशात् चित्वा लिखत ।
(iii) 'जागरितः' इति पदस्य समानार्थकम् पदं किम् ?

**(6) आदेशं प्राप्य उभौ प्राचलताम् तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कंधेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ । आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः । भारवतः शवस्य स्कंधेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रंदति स्म। तस्य क्रंदनं निशम्य मुदित आरक्षी तमुवाच - "रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः । इदानीं निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादंडं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवंतौ।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) अतीव कृशकायः कः आसीत् ?
(ii) सुपुष्टदेह कः आसीत् ?
(iii) कृशकाय कः आसीत् ?

II. पूर्णवाक्येन उत्तरत। (पूर्णवाक्य में उत्तर दीजिए।)
(i) शवमानीय उभौ कुत्र स्थापितवंतौ ?
(ii) कः भारवेदनया क्रन्दति स्म ?
(iii) जनस्य क्रन्दनं निशम्य आरक्षी किम् उक्तवान ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'सज्जनः' इत्यस्य पदस्य विलोम पदं गद्यांशात् चित्वा लिखत ।
(ii) 'रुदनं' इत्यस्य पदस्य पर्याय पदं गद्यांशे किं प्रयुक्तम् ?
(iii) 'स्थापितवन्तौ' इति क्रियापदस्य कर्तृपदं किम ?

# पद्यांशा:

अधोलिखितान् श्लोकान् पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत। (निम्नलिखित श्लोकों को पढ़कर उन पर आधारित प्रश्नों के उत्तर लिखिए।)

**(1) हरिततरुणां ललितलतानां माला रमणीया।**
**कुसुमावलिः समीर चालिता स्यान्मे वरणीया।**
**नवमालिका रसालं मिलिता रुचिरं संगमनम्।।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) कुसुमावलिः कस्मात् चालिता वरणीया ?
(ii) ललितलतानां माला कीदृशी भवेत् ?
(iii) रसालं मिलिता संगमनम् ?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)
(i) कथं रुचिरं संगमनम् ?
(ii) नवमालिका कम् मिलिता ?
(iii) यत् कविना स्वस्य कृते श्रेष्ठ वर्णितम् ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'माला रमणीया' अस्मिन् वाक्ये विशेष्य पदं किम् अस्ति ?
(ii) 'आम्र' इति पदस्य पर्याय पदं कवितांशे किम् ?
(iii) 'माला' इति पदस्य कः लिंग अस्ति ?

**2. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बंधुः कृत्वा यं नावसीदति।।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) महान रिपुः कः अस्ति ?
(ii) किं कृत्वा मनुष्यः न अवसीदति ?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)
(i) आलस्य कुत्र स्थितः अस्ति ?
(ii) श्रेष्ठः बन्धुः कः ?
(iii) कम् कृत्वा नरः न अवसीदति ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'उद्यमं' पदस्य विपर्यय पदं पद्यांशे किम् अस्ति ?
(ii) 'महान् रिपुः' अत्र विशेष्य पदं किम् ?
(iii) 'यं' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

**3. गुणी गुणं वेत्ति न वेत्ति निर्गुणो,**
**बली बलं वेत्ति न वेत्ति निर्बलः।**
**पिको वसंतस्य गुणं न वायसः,**
**करी च सिंहस्य बलं न मूषकः।।**

I. एकपदेन उत्तरत (एक पद में उत्तर दीजिए।)
(i) कीदृशं जनः बलं वेत्ति ?

(ii) कीदृशः जनः बलं न वेत्ति ?
(iii) निर्गुणः किम् न वेत्ति ?

II. पूर्णवाक्येन उत्तरत। (पूर्णवाक्य में उत्तर दीजिए।)
(i) कः सिंहस्य बलं जानाति ?
(ii) वसन्तस्य गुणं कः न वेत्ति ?
(iii) सिंहस्य बलं कः वेत्ति ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'बली' पदस्य विपर्यय पदं श्लोके किम् अस्ति ?
(ii) 'काकः' पदस्य पर्याय पदं श्लोके किम् अस्ति ?
(iii) काकः इति पदस्य समानार्थक पदं किम् ?

**4. मृगा मृगैः सङ्गमनुव्रजन्ति,**
**गावश्च गोभिः तुरगास्तुरङ्गैः ।**
**मूर्खाश्च मूर्खेः सुधियः सुधीभिः,**
**समान- शील- व्यसनेषु सख्यम्।।**
I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) के मृगैः सह अनुव्रजन्ति ?
(ii) सुधीभिः सह के तिष्ठन्ति ?
(iii) समानव्यवहार स्वभावयुक्तेषु जनासु परस्परं किं भवति ?

II. पूर्णवाक्येन उत्तरत। (पूर्णवाक्य में उत्तर दीजिए।)
(i) केषु सख्यम् भवति ?
(ii) तुरगाः कैः सह अनुव्रजन्ति ?
(iii) कः केन सह गच्छति ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'पंडिताः' पदस्य विपर्यय पदं श्लोके किम् अस्ति ?
(ii) 'अश्वाः' पदस्य पर्याय पदं श्लोके किम् अस्ति ?
(iii) 'मूर्खः' इति पदस्य विलोमपदं किम?

**5. पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।**
I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) विद्याधनं कः यच्छति ?
(ii) पिता पुत्राय कदा महत् विद्याधनं यच्छति?
(iii) पिताऽस्य तपस्तेपे किं?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर लिखिए।)
(i) पिता कस्मै विद्याधनम् यच्छति ?
(ii) “पिताऽस्य किं तपस्तेपे” इति उक्ति कस्य कृते कृतज्ञता ?
(iii) विद्याधनं महत् किम् ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'महत्' इतिपदं कस्य पदस्य विशेषणम् ?
(ii) 'ददाति' इति पदस्य पर्याय पदं श्लोके किं प्रयुक्तम् ?
(iii) 'पिता' इति पदस्य विलोमपदं किम ?

**6. अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।**
**तदेवाहुः महात्मानः समत्वमिति तथ्यतः ।।**
I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) नरस्य चित्ते किं भवेत् ?
(ii) अवक्रता यथा चित्ते तथा कुत्र भवेत् ?
(iii) ज्ञानस्य आधारः एव अस्ति ?

II. पूर्ण वाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)
(i) चित्ते वाचि च अवक्रता महात्माभिः किम् उच्यते ?
(ii) नरस्य वाचि किं भवेत् ?
(iii) महात्मानः समत्वं किं कथ्यते ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'सरलता' इत्यर्थे श्लोके किम् पदम् प्रयुक्तम् ?
(ii) "तदेवाहुः महात्मानः समत्वमिति तथ्यतः" अत्र क्रिया पदं किम् ?
(iii) 'वक्रता' इति पदस्य पर्याय किम् ?

**7. य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।**
**न कुर्यादहितं कर्म स परेभ्यः कदापि च।।**
I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) कः आत्मनः श्रेयः प्रभूतानि सुखानि इच्छति ?
(ii) नरः कीदृशं कर्म न कुर्यात् ?
(iii) सदैव किं रक्षेत् ?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)
(i) नरः किम् इच्छति ?
(ii) सः परेभ्यः कदापि च किं न कुर्यात् ?
(iii) सः प्रभूतानि कानि इच्छति ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'दुःखानि' इत्यस्य पदस्य विलोम पदं श्लोके किं प्रयुक्तम् ?
(ii) 'अत्यधिकानि' इति पदस्य पर्याय पदं श्लोके किं प्रयुक्तम् ?
(iii) 'मनुष्य' इति पदस्य विशेषणं पदं किम् ?

**8. रे रे चातक! सावधानमनसा मित्र! क्षणं श्रूयता-**
**मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।**
**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,**
**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।**
I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)

(i) सावधान मनसा कः कवेः वचनं शृणोतु ?
(ii) गगने के बहवः सन्ति ?

II. पूर्णवाक्येन उत्तरत। (पूर्णवाक्य में उत्तर दीजिए।)
(i) दीनं वचः कस्य पुरतः मा ब्रूहि ?
(ii) केचित् अम्भोदाः वसुधां कथं कुर्वन्ति ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'सन्ति' इति क्रियायाः कर्तृपदं श्लोके किं प्रयुक्तम् ?
(ii) 'सर्वेऽपि नैतादृशाः' अस्मिन् पदे 'सर्वे' इति सर्वनाम पदं केभ्यः प्रयुक्तम् ?

# नाट्यांशाः

**अधोलिखितान् गद्यांशानां पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत । (निम्नलिखित गद्यांशों को पढ़कर दिए गए प्रश्नों के उत्तर लिखिए।)**

**(1) रामः - सम्प्रति युज्यते । किं नामधेयम् ?**
**लवः - आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम्**
**कुशः - अहमपि कुश इत्यात्मानं श्रावयामि ।**
**रामः - अहो! उदात्तरम्यः समुदाचारः ।**
**किं नामधेयो भवतोर्गुरुः ?**
**लवः - ननु भगवान् वाल्मीकिः ।**
**रामः - केन संबंधेन?**
**लवः - उपनयनोपदेशेन ।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) लवस्य गुरुः कः ?
(ii) केन संबंधेन वाल्मीकिः गुरुः ?
(iii) तस्य नामधेयम् जानाम्यहं किम् ?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)
(i) किमर्थम् लवः आत्मानं श्रावयति ?
(ii) कुशलवयोः समुदाचारः कीदृशः आसीत् ?
(iii) सा क्रोधेन किं वदति ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'इत्यात्मानं श्रावयामि' अत्र क्रियापदं किम् ?
(ii) 'अधुना' इति पदस्य पर्याय पदं पद्यांशे किम् अस्ति ?
(iii) 'प्रश्न' इति पदस्य विपरीतार्थकम् पदं किम् ?

**(2) विदूषकः - (विचिन्त्य) एवं तावत् पृच्छामि निरनुक्रोश इति क एवं भणति ?**
**कुशः - अम्बा।**
**विदूषकः किं कुपिता एवं भणति, उत प्रकृतिस्था ?**
**कुशः यद्यावयोर्बालभावजनितं किञ्चिदविनयं पश्यति तदा एवम् अधिक्षिपति-निरनुक्रोशस्य पुत्रौ, मा चापलम् इति।**

**विदूषकः- एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति ।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)

(i) 'निरनुक्रोश' इति कः एव भणति ?

(ii) 'किं कुपिता एवं भणति' इति कः वदति ?

(iii) कौ यमलौ स्तः ?

II. पूर्णवाक्येन उत्तरत् । (पूर्ण वाक्य में उत्तर दीजिए । )

(i) कुशस्य माता कदा अधिक्षिपति ?

(ii) निरनुक्रोशस्य पुत्रौ, मा चापलम् इति का अधिक्षिपति ?

(iii) एतेन वचनेन दारकौ निर्भर्त्सयति किम् ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)

(i) 'माता' पदस्य पर्याय पदं गद्यांशे किम् ?

(ii) 'कुपिता एवं भणति' अत्र क्रियापदं किम् अस्ति ?

(iii) प्रस्तुत श्लोके 'चापलम्' इति पदस्य अर्थः किम् ?

**(3) (सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ)**

**विदूषकः - इत इत आर्यौ!**

**कुशलवौ - (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?**

**रामः - युष्मद्दर्शनात् कुशलमिव ।**

**भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एवं न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य।**

**(परिष्वज्य) अहो हृदयग्राही स्पर्शः।**

**उभौ - राजासनं खल्वेतत्, न युक्तमध्यासितुम् ।**

**रामः - सव्यवधानं न चारित्रलोपाय।**

**तस्मादङ्क- व्यवहितमध्यास्यतां सिंहासनम्।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)

(i) सिंहासने कः स्थः ?

(ii) रामम् उपसृत्य कौ प्रणमतः ?

(iii) विदूषकेन सह कौ प्रविशतः ?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)

(i) कस्य स्पर्शः रामाय हृदयग्राही आसीत् ?

(ii) किं चरित्रलोपाय न भवति ?

(iii) भवतो: किं भाजनम् एवं?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)

(i) 'उत' पदस्य विपर्यय पदं गद्यांशे किम् ?

(ii) 'इह' पदस्य पर्याय पदं गद्यांशे किम् अस्ति ?

(iii) 'कुशलवौ' इति कर्तृपदस्य क्रियापदं किम् ?

**(4) वनस्य दृश्यं । समीपे एवैका नदी वहति । एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति । क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः । तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति। एवमेव वानराः वारं वारं सिंहं तुदन्ति । क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति । वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति । निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति ।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) कस्य दृश्यम् अस्ति ?
(ii) के सिहं तुदन्ति ?
(iii) वनस्य समीपे का वहति ?

II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए ।)
(i) यदा सिंहः विश्राम्यते तदा किम् अभवत्?
(ii) विविधाः पक्षिणः किं दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति ?
(iii) वनराजः किमर्थं कुद्धः अभवत्?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) 'रुदन्ति' इत्यस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?
(ii) 'क्रुद्ध सिंह इतस्ततः धावति" इत्यस्मिन् वाक्ये क्रिया पदं किम् ?
(iii) वहति इति क्रियापदस्य कर्तृपदं किम् ?

**(5) (एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ एवं विवादं शृणुतः वदतः च)**
**व्याघ्रचित्रकौ अरे किं वनराजपदाय सुपात्रं चीयते ? एतदर्थं तु आवामेव योग्यौ । यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या |**

**सिंहः** तूष्णीं भव भोः। युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ । एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अतएव विचारविमर्शः प्रचलति ।
**बकः** सर्वथा सम्यगुक्तम् सिंहमहोदयेन । वस्तुतः एवं सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति ।
**सर्वे पक्षिणः (उच्चैः)** आम् आम्-कश्चित् खगः एव वनराजः भविष्यति इति ।
I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)
(i) कौ नदीजलं पातुमागतौ ?
(ii) 'तूष्णीं भव' इति कः कथयति ?
(iii) किमर्थं सुपात्रं चीयते ?

II. पूर्णवाक्येन उत्तरत। (पूर्णवाक्य में उत्तर दीजिए।)
(i) वन्यजीवाः कं रक्षकपदयोग्यं न मन्यन्ते ?
(ii) कुत्र संशीतिलेशस्यस्यापि अवकाशः एव नास्ति ?
(iii) सर्वे पक्षिणः उच्चैः किं कथयन्ति ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) "एतदर्थं तु आवमेव योग्यौ" इत्यस्मिन् वाक्ये 'आवां' , इति सर्वनाम् पदं काभ्याम् प्रयुक्तम् ?
(ii) 'कश्चित् खगः एवं वनराजः भविष्यति' अत्र क्रियापदं किम् ?

(iii) 'प्रसन्नताः' इति पदस्य विलोमपदं किम् ?

**(6)** **काकः** आम् सत्यं कथितं त्वया-वस्तुतः वनराजः भवितुं तु अहमेव योग्यः ।

**पिकः** (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं यत्र तत्र का का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि । न रूपम्, न ध्वनिरस्ति । कृष्णवर्णम् मेध्यामेध्यभक्षकं त्वां कथं वनराज मन्यामहे वयम् ?
**काकः** अरे! अरे ! किं जल्पसि? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते
**उदाहरणस्वरूपा** "अनृतं वदसि चेत् काकः दशेत्" - इति प्रकारेण । अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम्। अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते ।
**पिकः** अलम् अलम् अतिविकत्थनेन कि विस्मयते यत्- काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः । वसंतसमये प्राप्ते काकः काकः पिकः पिकः ।।
**काकः** रे परभृत् अहं यदि तव संतति न पालयामि तर्हि कुत्र स्युः पिकाः ?
अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।

I. एकपदेन उत्तरत (एक पद में उत्तर दीजिए।)
(i) पिककाकयोः भेदः कदा ज्ञायते ?
(ii) कः कर्कशध्वनिना वातावरणम् आकुलीकरोषि ?
(iii) काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते ?

II. पूर्णवाक्येन उत्तरत। (पूर्णवाक्य में उत्तर दीजिए।)
(i) अन्ते काकः पिकं प्रति किं वदति ?
(ii) काकः कदा दशेत् ?
(iii) पिककाकयोः भेद कदा ज्ञायते ?

III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)
(i) "यदि अहं कृष्णवर्णः" इत्यस्मिन् वाक्ये 'अहं' इति सर्वनाम् पदं कस्मै प्रयुक्तम् ?
(ii) 'सत्यम्' इति पदस्य विलोम पदं गद्यांशात् चित्वा लिखत |
(iii) ऐक्यं इति पदस्य कः अर्थः ?

# उत्तरमाला

## गद्यांशाः

**(1)**
I. (i) गहनकानने
(ii) तस्य भार्या
(iii) देउल

II. (i) बुद्धिमती पुत्रौ चपेटया प्रहृत्य जगाद कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ ? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।
(ii) राजसिंहः देउलाख्ये ग्रामे वसति स्म।
(iii) एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

III. (i) 'अस्ति देउलाख्यो ग्रामः' अत्र क्रिया पदं 'अस्ति' अस्ति।
(ii) 'एकं व्याघ्रं ददर्श' अस्मिन् वाक्ये विशेष्य पदं 'व्याघ्रं' अस्ति।
(iii) गच्छन्तम् पदम् अस्ति।

**(2)**
I. (i) वृषभः / दुर्बलवृषभः
(ii) सर्वधेनुनाम्
(iii) वृषभम् / दुर्बलवृषभम्
II. (i) स्वपुत्रस्य (वृषभस्य) दैन्यं दृष्ट्वा सुरभिः रोदिति स्म।
(ii) क्रुद्धः कृषीवलः / कृषकः पतितं वृषभम् उत्थापयितुं प्रायतत ।
(iii) सुराधिपः सुरभिम् अपृच्छत् ।
III. (i) अश्रूणि
(ii) क्रुद्धः
(iii) जवेन

**(3)**
I. (i) दुर्बले
(ii) जलोपप्लवः
(iii) जलोपप्लवः
II. (i) सुरभिवचनं श्रुत्वा इंद्रः अवदत् यत् गच्छ वत्से ! सर्वं भद्रं जायेत ।
(ii) वृषभौ नीत्वा कृषकः गृहमागत्।
(iii) मम् बहुन्यपत्यानि तदापि पुत्रे विशिष्य आत्मवेद नामनुभवामि ।
III. (i) 'कल्याणं पदस्य पर्याय पदं गद्यांशे 'भद्रं' अस्ति।
(ii) 'दुर्बले सुते' अत्र विशेष्य पदं गद्यांशे 'सुते' अस्ति ।
(iii) अत्र पदं ल्यप् प्रत्ययः अस्ति ।

**(4)**
I. (i) भूरि परिश्रम्य
(ii) अध्ययने
(iii) अर्थकाश्र्येन
II. (i) जनः अर्थकाश्र्चेन पीडितः पदातिः प्राचलत्।
(ii) निशान्धकारे प्रसृते अचिन्तयत् विजने प्रदेशे पदयात्रा न शुभावहा ।
(iii) तनूजस्य रुग्णताम् आकर्ण्य पिता व्याकुलः जातः ।
III. (i) पुत्रः इति पदस्य पर्याय पदं गद्यांशे 'तनयः'
(ii) 'करुणापरो गृही तस्मै आश्रय' अत्र तस्मै सर्वनाम पदं 'निर्धनाय' प्रयुक्तम्।
(iii) अत्र समभूत क्रियापदम् अस्ति।

**(5)**
I.(i) विचित्रा
(ii) चौरः
(iii) आरक्षी ।
II. (i) यद्यपि ग्रामस्य आरक्षी चौरः आसीत् ।
(ii) ग्रामवासिनः अतिथिमेव चौरं मत्वाऽभर्त्सयन्।
(iii) आरक्षी निहितामेकां मञ्जूषाम् आदाय पलायितः ।

III. (i) 'प्रबुद्धः अतिथिः' इत्यनयोः पदयोः विशेष्य पदं 'अतिथिः' अस्ति।
(ii) 'नीच्चैः' इति पदस्य विलोम पदं गद्यांशे 'उच्चैः' अस्ति।
(iii) इति प्रबुद्धः समानार्थ पदम् अस्ति।

**(6)**
I. (i) अभियुक्तः (ii) आरक्षी (iii) अतिथिः।
II. (i) शवमानीय उभौ एकस्मिन् चत्वरे स्थापितवतौ।
(ii) अभियुक्तः भारवेदनया क्रन्दति स्म ।
(iii) जनस्य क्रन्दनं निशम्य आरक्षी उक्तवान्-रे दुष्ट! तस्मिन् दिने त्वया अहं चोरितायाः मञ्जूषायाः ग्रहणात् वारितः ।
III. (i) 'सज्जनः' इत्यस्य पदस्य विलोम पदं गद्यांशे 'दुष्टः अस्ति।
(ii) 'रुदनं' इत्यस्य पदस्य पर्याय पदं गद्यांशे 'क्रंदनं' प्रयुक्तम् अस्ति।
(iii) अत्र कर्तृपदं उभौ अस्ति।

# पद्यांशाः
**(1)**
I. (i) समीरात्
(ii) रमणीया
(iii) रुचिरं ।
II. (i) नवमालिका रसालं मिलिता रुचिरं संगमनम्
(ii) नवमालिका रसालम् मिलिता।
(iii) हरिततरूणां, ललितलतानां माला कुसुमावलि इत्यादि ।
III. (i) 'माला रमणीया' अस्मिन् वाक्ये विशेष्य पदं 'माला' अस्ति।
(ii) 'आम्रम्' इति पदस्य पर्याय पदं कवितांशे 'रसालम्' अस्ति।
(iii) माला शब्दः स्त्रीलिङ्गः अस्ति ।

**(2)**
I. (i) आलस्य
(ii) उद्यमः
II. (i) आलस्य मनुष्याणां शरीरे स्थितः अस्ति।
(ii) श्रेष्ठः बन्धुः उद्यमः ।
(iii) उद्यमेन परिश्रम कृत्वा नरः न अवसीदति।
III. (i) 'उद्यमं' पदस्य विपर्यय पदं पद्यांशे 'आलस्यम्' अस्ति
(ii) 'महान् रिपुः' अत्र विशेष्य पदं 'रिपुः' अस्ति।
(iii) इति उद्यमाय सर्वनामपदम् अस्ति।

**(3).**
I. (i) बली
(ii) निर्बलः
(iii) गुणम्।
II. (i) करी सिंहस्य बलं जानाति।
(ii) वसन्तस्य गुणं वायसः न वेत्ति ।
(iii) करी च सिंहस्य बल न मूषकः ।

III. (i) 'बलीपदस्य विपर्यय पदं श्लोके 'निर्बलः' अस्ति ।
(ii) 'काकः' पदस्य पर्याय पदं श्लोके 'वायसः' अस्ति।
(iii) अत्र वायसः समानार्थकं पदम् अस्ति ।

**(4)**
I. (i) मृगाः
(ii) सुधियः
(iii) सख्यम् (मित्रता) |
II. (i) समान-शील- व्यसनेषु सख्यम् भवति।
(ii) तुरगाः तुरङ्गैः सह अनुव्रजन्ति ।
(iii) अत्र गावश्च गोभिः एवं तुरङ्गास्तुरङ्गैः, मूर्खाश्च मूर्खः च सुधियः सुधीभिः सह गच्छति ।

III. (i) 'पंडिता' पदस्य विपर्यय पदं श्लोके 'मूर्खाः' अस्ति।
(ii) 'अश्वाः' पदस्य पर्याय पदं श्लोके 'तुरगाः' अस्ति।
(iii) अत्र पण्डितः विलोमपदम् अस्ति।

**(5)**
I.(i) पिता
(ii) बाल्ये
(iii) इत्युक्तिस्तत्कृतज्ञता ।
II. (i) पिता, पुत्राय विद्याधनं यच्छति।
(ii) पिताऽस्य किं तपस्तेपे इति उक्ति पितुः कृते कृतज्ञता ।
(iii) विद्याधनं सर्वप्रधानम् श्रेष्ठं अस्ति।
III. (i) 'महत्' इति पदस्य विशेषणम् 'विद्याधनम्' अस्ति।
(ii) 'ददाति' इति पदस्य पर्याय पदं श्लोके 'यच्छति' प्रयुक्तम् ।
(iii) पिता इति पदस्य विलोमपदम् 'माता' अस्ति।

**(6)**
I.(i) अवक्रता
(ii) वाचि
(iii) विद्या
II. (i) चित्ते वाचि च अवक्रता महात्माभिः समत्वं उच्यते।
(ii) नरस्य वाचि अवक्रता भवेत्।
(iii) यथा चित्ते अवक्रता तथा वाचि भवेत महात्मानः समत्वं इति कथ्यते।
III. (i) 'सरलता' इत्यर्थे श्लोके 'अवक्रता' पदम् प्रयुक्तम्।
(ii) 'तदेवाहुः महात्मनः समत्वमिति तथ्यतः अत्र क्रिया पदं 'आहुः' अस्ति ।
(iii) वक्रता इति पदस्य पर्यायं कुटिलता अस्ति ।

**(7)**
I. (i) नरः
(ii) अहितं
(iii) सदाचारं
II. (i) नरः आत्मनः श्रेयः प्रभूतानि सुखानि इच्छति ।

(ii) सः परेभ्यः कदापि च अहितं कर्म न कुर्यात् ।
(iii) सः प्रभूतानि सुखानि सर्वेकल्याणं इच्छति।
III. (i) 'दुःखानि' इत्यस्य पदस्य विलोम पदं श्लोके 'सुखानि' अस्ति।
(ii) 'अत्यधिकानि' इति पदस्य पर्याय पदं श्लोके 'प्रभूतानि' अस्ति।
(iii) अत्र पदस्य 'मनुष्यता' विशेषणं पदम् अस्ति।

**(8)**
I. (i) चातकः
(ii) अम्भोदाः
II. (i) दीनं वचः यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि
(ii) केचित् अम्भोदाः वसुधां वृष्टिभिरार्द्रयन्ति।
III. (i) 'सन्ति' इत्यस्य कर्तृपदं 'अम्भोदाः' अस्ति।
(ii) 'सर्वे' सर्वनाम पदं 'अम्भोदेभ्यः' प्रयुक्तम्।

# नाट्यांशा:

**(1)**

I. (i) वाल्मीकिः
(ii) उपनयनोपदेशेन
(iii) कुश:
II. (i) आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयाति ।
(ii) कुशलवयोः समुदाचारः उदात्तरम्यः आसीत् ।
iii) यद्यावयोबलिभावजनितं किञ्चिदविजयं पश्यति तदा एवम् अधिक्षिपति-निरनुक्रोशस्य पुत्रौ मा चापलम् इति।
III. (i) 'इत्यात्मानं श्रावयामि अत्र क्रिया पदं श्रावयामि' अस्ति।
(ii) 'अधुना' इतिपदस्य पर्याय पदं पद्यांशे सम्प्रति अस्ति।
(iii) इति पदस्य प्रतिवचनं पदम् अस्ति।

**(2)**
I. (i) अम्बा
(ii) विदूषकः
(iii) लवकुशौ ।
II. (i) यद्याबयोर्बालभावजनितं किञ्चिदविनयं पश्यति तदा एवम् अधिक्षिपति निरनुक्रोशस्य पुत्रौ मा चापलम् इति ।
(ii) निरनुक्रोशस्य पुत्रौ मा चापलम् इति कुशलवयोः माता अधिक्षिपति।
(iii) अत्र नामधेयम् एतयोर्जननी तेनावमानिता।
III. (i) 'माता' पदस्य पर्याय पदं गद्यांशे 'अम्बा' अस्ति।
(ii) 'कुपिता एव भणति' अत्र क्रिया पदं भणति' अस्ति।
(iii) अत्र पदस्य चंचलता अर्थ भवति ।

**(3)**
I. (i) रामः

(ii) कुशलवौ
(iii) लवकुशौ ।
II. (i) कुशलवयोः स्पर्शः रामाय हृदयग्राही आसीत्।
(ii) सव्यवधानं चरित्रलोपाय न भवति।
(iii) भवतोः वयमत्र कुशलप्रश्नस्य भाजनम् अस्ति।
III. (i) 'उत' पदस्य विपर्यय पदं गद्यांशे 'इत' अस्ति।
(ii) 'इह' पदस्य पर्याय पदं गद्यांशे 'अत्र' अस्ति।
(iii) अत्र प्रविशतः क्रियापदम् अस्ति।

**(4)**
I.(i) वनस्य
(ii) वानराः
(iii) नदी
II. (i) सदैव एकः वानरः आगत्य तस्य पुच्छं घुनोति।
(ii) विविधः पक्षिणः अपि सिंहस्य एतादृशी दशां दृष्टवा हर्षमिमितं कलरवं कुर्वन्ति ।
(iii) निद्राभङ्गदुःखेन वनराजः कुहद अभवत् ।
III. (i) 'रुदन्ति' इत्यस्य विलोम पदं गद्यांशे 'हसन्ति' अस्ति।
(ii) 'क्रुद्धः सिंह इतस्ततः धावति" इत्यस्मिन् वाक्ये क्रिया पदं 'धावति' अस्ति।
(iii) इति पदस्य नदी कर्तृपदं अस्ति।

**(5)**
I.(i) व्याघ्रचित्रकौ
(ii) सिंहः
(iii) वनराजपदाय
II. (i) एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते।
(ii) वस्तुतः एव सिंहेव बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निक्षेतत्यम् ।
(iii) आम्-आम् कश्चित खगः एव वनराजः भविष्यति इति ।
III. (i) " एतदर्थं तु आवमेव योग्यौ" इत्यस्मिन् वाक्ये 'आवां' इति सर्वनाम पदं 'व्याघ्रचित्रकाभ्या' प्रयुक्तम् ।
(ii) "कश्चित् खगः एव वन राजः भविष्यति" अत्र क्रिया पदं गद्यांशे 'भाविष्यति' अस्ति।
(iii) अत्र पदस्य दुःखी विलोमपदम् अस्ति।

**(6)**
I. (i) वसन्तसमये
(ii) काकः
(iii) आदर्श:
II. (i) अन्ते काकः पिकं प्रति वदति "अरे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहं एवं करूणापरः पक्षिसम्राट् काकः" इति ।
(ii) अनृतं वदसि चेत् काकः दशेत् ।
(iii) वसन्तसमये प्राप्ते पिककाकयोः भेदाः ज्ञायते ।
III. (i) "यति अहं कृष्णवर्णः" इत्यस्मिन् वाक्ये 'अहं' इति सर्वनाम पदं 'काकाय प्रयुक्तम्।
(ii) 'सत्यम्' इति पदस्य विलोम पदं गद्यांशे 'अनृतं' इति अस्ति।
(iii) अत्र पदस्य अर्थः एकता अस्ति।

# प्रश्ननिर्माणम्

# प्रश्ननिर्माणम्

**अवधातव्यम्**

- छात्रा: किम् - शब्दस्य त्रिषु लिङ्गेषु सर्वाणि रूपाणि अर्थसहितं अवश्यं पठेयु: ।
- एतेषां सप्तविभक्तिषु अपि सर्वेषां रूपाणाम् अध्ययनं करणीयम् ।
- रूपाणि अध: दीयन्ते ।

**किम् - शब्दः पुल्लिङ्गे -**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | क: | कौ | के |
| **द्वितीया** | कम् | कौ | कान् |
| **तृतीया** | केन | काभ्याम् | कै: |
| **चतुर्थी** | कस्मै | काभ्याम् | केभ्य: |
| **पञ्चमी** | कस्मात् | काभ्याम् | केभ्य: |
| **षष्ठी** | कस्य | कयो: | केषाम् |
| **सप्तमी** | कस्मिन् | कयो: | केषु |

**किम् - शब्दः स्त्रीलिङ्गे -**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | का | के | का: |
| **द्वितीया** | काम् | के | का: |
| **तृतीया** | कया | काभ्याम् | काभि: |
| **चतुर्थी** | कस्यै | काभ्याम् | काभ्य: |
| **पञ्चमी** | कस्या: | काभ्याम् | काभ्य: |
| **षष्ठी** | कस्या: | कयो: | कासाम् |
| **सप्तमी** | कस्याम् | कयो: | कासु |

**किम् - शब्दः नपुंसकलिङ्गे -**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | किम् | के | कानि |
| **द्वितीया** | किंम् | के | कानि |
| **तृतीया** | केन | काभ्याम् | कैः |
| **चतुर्थी** | कस्मै | काभ्याम् | केभ्यः |
| **पञ्चमी** | कस्मात् | काभ्याम् | केभ्यः |
| **षष्ठी** | कस्य | कयोः | केषाम् |
| **सप्तमी** | कस्मिन् | कयोः | केषु |

रेखाङ्कितपदस्य आधारेण एव प्रश्ननिर्माणं करणीयम् । सामानयतः प्रश्ननिर्माणाय प्रथमं रेखाङ्कितपदस्य लिङ्गं विभक्तिं वचनं च दृष्ट्वा तस्य स्थाने तस्मिन् लिङ्गे तस्यां विभक्तौ तस्मिन् वचने च किं शब्दस्य रूपं लेखनीयम् । कुत्रचित् प्रश्नवाचकपदानां (सप्तककाराणां) प्रयोगः करणीयः ।

- **सप्त-ककाराः प्रश्ननिर्माणकार्ये सहायकाः।**

किम् कुत्र कति कदा

कुतः कथम् किमर्थम्

| सप्तककाराणाम् अर्थाः | | |
|---|---|---|
| किम् | क्या | What / Is it |
| कुत्र | कहाँ | Where |
| कति | कितने | How many |
| कदा | कब | When |
| कुतः | कहाँ से / क्यों | From Where / Why |
| कथम् | कैसे | How |
| किमर्थम् | किसलिए | For What / Why |

- यदि वाक्ये रेखाङ्कितपदम् अन्यपदस्य विशेषणपदम् अस्ति तर्हि प्रश्ने **कीदृश** शब्दस्य प्रयोगः कर्तव्य: । पुल्लिङ्गे - कीदृश:, स्त्रीलिङ्गे - कीदृशी, नपुंसकलिङ्गे - कीदृशं च ।

## पाठाधारिता: केचन अभ्यासा:

### प्रथम पाठः - शुचिपर्यावरणम्।

1. शतशकटीयानं **कज्जलमलिनं** धूमं मुञ्चति ।
2. मानवजीवनाय **शुचिपर्यावरणम्** आवश्यकम् ।
3. चक्रं सदा **वक्रं** भ्रमति ।
4. शतशकटीयानं कज्जलमलिनं **धूमं** मुञ्चति ।
5. पाषाणीसभ्यतायाम् **लतातरुगुल्मा:** प्रस्तरतले पिष्टा: भवन्ति ।

### द्वितीयः पाठ: - बुद्धिर्बलवती सदा

1. व्याघ्र: **श्रुगालेन** सह पुन: आगच्छत् ।
2. पुरा **त्वया** मह्यं त्रय: व्याघ्रा: दत्ता: ।
3. त्वं **मानुषात्** अपि बिभेषि ।
4. पुत्रौ **व्याघ्रभक्षणाय** कलहं कुरुतः ।
5. मां **निजगले** बद्ध्वा चल ।

### चतुर्थ पाठ: - शिशुलालनम्

1. लवः **रामस्य** समीपम् उपसृत्य प्रणम्य च वदतः ।
2. अहम् अत्र भवतो: **जनकं** नामतो वेदितुमिच्छामि।
3. तस्याः **द्वे** नामनी ।
4. लव: कुश: च **भ्रातरौ** आस्ताम् ।
5. बालभावात् हिमकर: **पशुपतिमस्तके** विराजते ।

### पञ्चम पाठ: - जननी तुल्यवत्सला

1. स ऋषभः **क्षेत्रे** पपात ।
2. दुर्बले सुते **मातु:** अत्यधिका कृपा ।
3. बहूनि **अपत्यानि** सन्ति ।
4. पुत्रस्य **दैन्यं** दृष्ट्वा अहं रोदिमि ।
5. **धेनूनां** माता सुरभिः आसीत् ।

**षष्ठपाठः - सुभाषितानि**

१ **अस्तमये** सविता रक्तः भवति।

२ वायसः **वसन्तस्य** गुणं न जानाति।

३ मानवः **निमित्तम्** उद्दिश्य प्रकुप्यति।

४ **क्रोधः** देहविनाशाय प्रथमः शत्रुः।

५ **गुणी** गुणं वेत्ति।

६ महताम् **सम्पत्तौ च विपत्तौ च** एकरूपता भवति।

७ फलच्छायासमन्वितः **महान्** वृक्षः सेवितव्यः।

**सप्तमः पाठः - सौहार्दं प्रकृतेः शोभा।**

१ मयूरः **विधात्रा** एव पक्षिराजः कृतः।

२ मयूरस्य नृत्यं तु **प्रकृतेः** आराधना।

३ **सिंहमहोदयेन** सम्यगुक्तम्।

४ बकस्य कारणेन तु सर्वं पक्षिकुलम् **अवमानितम्** जातम्।

५ **राजा** तु रक्षकः भवति।

६ **नदीमध्ये** एकः बकः आसीत्।

७ सिंहः **सर्वजन्तून्** दृष्ट्वा पृच्छति।

**अष्टमः पाठः - विचित्रः साक्षी**

१ न्यायाधीशः अतिथिं **ससम्मानं** मुक्तवान्।

२ शवः **प्रावारकम्** अपसार्य निवेदितवान्।

३ **मतिवैभवशालिनः** जनाः दुष्कराणि कर्माणि प्रकुर्वते।

४ **निशान्धकारे** पदयात्रा न शुभावहा।

५ जनाः **वराकम्** अतिथिं चौरं मत्वा अभर्त्सयन्।

६ तत्तनयः **पठनाय** छात्रावासे वसति स्म।

७ **आरक्षिणा** अध्वनि यदुक्तं तत् वर्णयामि।

**नवमः पाठः - सूक्तयः**

१ विवेकी एव **तत्वार्थनिर्णयं** करोति।

२ मनुष्यः आत्मनः **श्रेयः** इच्छति।

३ जन: **अहितं** कर्म न कुर्यात् ।

४ इदं **विद्वांस:** कथयन्ति ।

५ सदाचार: अवश्यमेव **जनै:** पालनीय: वर्तते ।

६ स: **प्राणेभ्य:** अपि विशिष्ट: भवति ।

७ **विवेकेन** यथार्थनिर्णय: भवति ।

**द्वादश: पाठ: - अन्योक्तय:**

१ एकेन एव राजहंसेन **सरस:** शोभा भवेत् ।

२ न सा परितस्तीरवासिना **बकसहस्रेण** भवेत् ।

३ एवं **नलिनानि** अनेकानि निषेवितानि ।

४ मालाकार! **भवता** करुणया तरो: अस्य तोयैरल्पैरपि पुष्टि: व्यरचि ।

५ भवता भीमभानौ निदाघे **करुणया** पुष्टि: व्यरचि ।

६ **पतङ्गा:** परित: अम्बरपथम् आपेदिरे ।

७ **एक:** चातक: वने वसति ।

८ एक: **चातक:** वने वसति ।

९ एक: चातक: **वने** वसति ।

**अभ्यासप्रश्ना:**

1. रामाय कुशलवयो: कण्ठाश्लेषस्य स्पर्श: **हृदयग्राही** आसीत् ।
2. **सहस्राधिकेषु** पुत्रेषु सत्स्वपि सा दु:खी आसीत् ।
3. **अतिदीर्घ:** प्रवासोऽयं दारुणश्च ।
4. तपोवनवासिनो देवीति **नाम्ना** आह्वयन्ति ।
5. **मया** अपि सम्माननीय: एव मुनिनियोग: ।
6. **मार्गे** सा एकं व्याघ्रं ददर्श ।
7. **अपूर्वं** खलु नामधेयम् ।
8. सः **कृच्छ्रेण** भारमुद्वहति ।
9. **सुराधिप:** तामपृच्छत् ।
10. **आर्यस्य** वन्दनायां लव इत्यात्मानं श्रावयामि ।
11. अयम् **अन्येभ्य:** दुर्बल: ।
12. **तपोवने** तस्य नाम व्यवहरति।
13. **कृषीवल:** क्रुद्ध: अभवत् ।
14. कृषकः **दीनं** तं बहुधा पीडयति ।

15. परं **प्रत्युत्पन्नमतिः** सा जम्बुकम् उवाच।
16. अपूर्वोऽयं **मानवानां** सरस्वत्यवतार:।
17. क्रुद्धः **कृषीवलः** तमुत्थापयितुम् बहुवारं यत्नमकरोत्।
18. उपाध्यायदूत: **अस्मान्** त्वरयति।
19. सर्वत्रैव **जलोपप्लव:** सञ्जातः।
20. सा तपस्विनी मत्कृतेन **अपराधेन** स्वापत्यमेव भणति।
21. रे राजहंस ! भवता **मृणालपटली** भुक्ता।
22. तस्य **सरोवरस्य** केन कृत्येन कृतोपकार: त्वं भवितासि ?
23. जन: प्रभूतानि **सुखानि** इच्छति।
24. अवक्रता यथा **चित्ते** अस्ति।
25. सः **प्राणेभ्य:** अपि विशेष: भवति।
26. मनुष्यः **आत्मन:** श्रेयः इच्छति।
27. जन: अहितं **कर्म** न कुर्यात्।
28. भारवत: शवस्य स्कन्धेन वहनं **दुष्करम्** आसीत्।
29. **पदातिक्रमेण** संचलन् सायम् अभवत्।
30. निशान्धकारे **पदयात्रा** न शुभावहा।
31. सः **भारवेदनया** क्रन्दति स्म।
32. **व्याघ्रचित्रकौ** नदीजलं पातुम् आगतौ।
33. **क्रोधः** देहविनाशाय प्रथम: शत्रु:।
34. मूर्खाः **मूर्खैः** सह अनुव्रजन्ति।
35. अमन्त्रम् **अक्षरं** नास्ति।
36. **नराणां** प्रथम: शत्रु: क्रोध: अस्ति।
37. लव: कुश: च **भ्रातरौ** आस्ताम्।
38. बालभावात् हिमकर: **पशुपतिमस्तके** विराजते।
39. **मां** निजगले बद्ध्वा चल सत्वरम्।
40. **व्याघ्र:** श्रृगालेन सह पुन: आगच्छत्।
41. पाषाणीसभ्यतायां **लतातरुगुल्मा:** प्रस्तरतले पिष्टा: भवन्ति।
42. चक्रं सदा **वक्रं** भ्रमति।
43. भवता भीमभानौ निदाघे **करुणया** पुष्टि: व्यरचि।
44. मनुष्य: आत्मन: **श्रेय:** इच्छति।
45. तत्तनय: **पठनाय** छात्रावासे वसति स्म।

46. दुर्बलसुते **मातुः** अत्यधिका कृपा।
47. अहम् अत्र भवतो: **जनकं** नामतो वेदितुमिच्छामि।
48. मां **निजगले** बद्ध्वा चल सत्वरम्।
49. पाषाणीसभ्यतायाम् लतातरुगुल्मा: **प्रस्तरतले** पिष्टा: भवन्ति।
50. **पुत्रौ** व्याघ्रभक्षणाय कलहं कुरुतः।

## प्रश्ननिर्माणम् - उत्तरकुञ्चिका

**प्रथम पाठ: - शुचिपर्यावरणम्।**

1. शतशकटीयानं **किं / कीदृशं** धूमं मुञ्चति ?
2. मानवजीवनाय **किम्** आवश्यकम् ?
3. चक्रं सदा **कथं** भ्रमति ?
4. शतशकटीयानं कज्जलमलिनं **कं** मुञ्चति ?
5. पाषाणीसभ्यतायाम् **के** प्रस्तरतले पिष्टा: भवन्ति ?

**द्वितीयः पाठ: - बुद्धिर्बलवती सदा**

1. व्याघ्र: **केन** सह पुन: आगच्छत् ?
2. पुरा **केन** मह्यं त्रय: व्याघ्रा: दत्ता: ?
3. त्वं **कस्मात्** अपि बिभेषि ?
4. पुत्रौ **किमर्थं** कलहं कुरुतः ?
5. मां **कुत्र / कस्मिन्** बद्ध्वा चल ?

**चतुर्थ पाठ: - शिशुलालनम्**

1. लवः **कस्य** समीपम् उपसृत्य प्रणम्य च वदतः ?
2. अहम् अत्र भवतो: **कं** नामतो वेदितुमिच्छामि ?
3. तस्याः **कति** नामनी ?
4. लव: कुश: च **कौ** आस्ताम् ?
5. बालभावात् हिमकर: **कुत्र / कस्मिन्** विराजते ?

**पञ्चम पाठ: - जननी तुल्यवत्सला**

1. स ऋषभः **कुत्र / कस्मिन्** पपात ?
2. दुर्बले सुते **कस्या:** अत्यधिका कृपा ?
3. बहूनि **कानि** सन्ति ?
4. पुत्रस्य **किं** दृष्ट्वा अहं रोदिमि ?
5. **धेकासां** माता सुरभिः आसीत् ?

**षष्ठपाठः - सुभाषितानि**

१ **कदा** सविता रक्त: भवति ?

२ वायस: **कस्य** गुणं न जानाति ?

३ मानव: **किम्** उद्दिश्य प्रकुप्यति ?

४ **क:** देहविनाशाय प्रथम: शत्रु: ?

५ **क:** गुणं वेत्ति ?

६ महताम् **कुत्र** एकरूपता भवति ?

७ फलच्छायासमन्वित: **कीदृश: / क:** वृक्ष: सेवितव्य: ?

**सप्तम: पाठ: - सौहार्दं प्रकृते: शोभा ।**

1. मयूर: **केन** एव पक्षिराज: कृत: ?
2. मयूरस्य नृत्यं तु **कस्या:** आराधना ?
3. **केन** सम्यगुक्तम् ?
4. बकस्य कारणेन तु सर्वं पक्षिकुलम् **कीदृशं** जातम् ?
5. **क:** तु रक्षक: भवति ?
6. **कुत्र** एक: बक: आसीत् ?
7. सिंह: **कान्** दृष्ट्वा पृच्छति ?

**अष्टम: पाठ: - विचित्र: साक्षी**

1. न्यायाधीश: अतिथिं **कथं** मुक्तवान् ?
2. शव: **किम्** अपसार्य निवेदितवान् ?
3. **कीदृशा: / के** जना: दुष्कराणि कर्माणि प्रकुर्वते ?
4. **कदा / कस्मिन् समये** पदयात्रा न शुभावहा ?
5. जना: **कीदृशम् / कम्** अतिथिं चौरं मत्वा अभर्त्सयन् ?
6. तत्तनय: **किमर्थं** छात्रावासे वसति स्म ?
7. **केन** अध्वनि यदुक्तं तत् वर्णयामि ?

**नवम: पाठ: - सूक्तय:**

1. विवेकी एव **कं** करोति ?
2. मनुष्य: आत्मन: **किम्** इच्छति ?
3. जन: **कीदृशं / किं** कर्म न कुर्यात् ?
4. इदं **के** कथयन्ति ?
5. सदाचार: अवश्यमेव **कै:** पालनीय: वर्तते ?
6. स: **केभ्य:** अपि विशिष्ट: भवति ?
7. **केन** यथार्थनिर्णय: भवति ?

**द्वादश: पाठ: - अन्योक्तय:**

1. एकेन एव राजहंसेन **कस्य** शोभा भवेत् ?
2. न सा परितस्तीरवासिना **केन** भवेत् ?
3. एवं **कानि** अनेकानि निषेवितानि ?
4. मालाकार! **केन** करुणया तरो: अस्य तोयैरल्पैरपि पुष्टि: व्यरचि ?
5. भवता भीमभानौ निदाघे **कया** पुष्टि: व्यरचि ?
6. **के** परित: अम्बरपथम् आपेदिरे ?
7. **कति** चातक: वने वसति ?
8. एक: **क:** वने वसति ?
9. एक: चातक: **कुत्र** वसति ?

**अभ्यासप्रश्ना: - उत्तरकुञ्चिका**

1. रामाय कुशलवयो: कण्ठाश्लेषस्य स्पर्श: **कीदृश:**आसीत् ?
2. **कति** / **केषु** पुत्रेषु सत्स्वपि सा दु:खी आसीत् ?
3. **कीदृश:** / **क:** प्रवासोऽयं दारुणश्च ?
4. तपोवनवासिनो देवीति **केन** आह्वयन्ति ?
5. **केन** अपि सम्माननीय: एव मुनिनियोग: ?
6. **कुत्र** / **कस्मिन्** सा एकं व्याघ्रं ददर्श ?
7. **किं** / **कीदृशम्** खलु नामधेयम् ?
8. सः **कथं** / **केन** भारमुद्वहति ?
9. **क:** तामपृच्छत् ?
10. **कस्य** वन्दनायां लव इत्यात्मानं श्रावयामि ?
11. अयम् **केभ्य:** दुर्बल: ?
12. **कुत्र** / **कस्मिन्** तस्य नाम व्यवहरति ?
13. **क:** क्रुद्ध: अभवत् ?
14. कृषकः **कं** / **कीदृशम्** तं बहुधा पीडयति ?
15. परं **कीदृशी** / **का** सा जम्बुकम् उवाच ?
16. अपूर्वोऽयं **केषां** सरस्वत्यवतार: ?
17. क्रुद्ध: **क:** तमुत्थापयितुम् बहुवारं यत्नमकरोत् ?
18. उपाध्यायदूत: **कान्** त्वरयति ?
19. सर्वत्रैव **क:** सञ्जातः ?
20. सा तपस्विनी मत्कृतेन **केन** स्वापत्यमेव भणति ?

21. रे राजहंस ! भवता **का** भुक्ता ?
22. तस्य **कस्य** केन कृत्येन कृतोपकार: त्वं भवितासि ?
23. जन: प्रभूतानि **कानि** इच्छति ?
24. अवक्रता यथा **कुत्र** / **कस्मिन्** अस्ति ?
25. सः **केभ्य:** अपि विशेष: भवति ?
26. मनुष्यः **कस्य** श्रेयः इच्छति ?
27. जन: अहितं **किं** न कुर्यात् ?
28. भारवत: शवस्य स्कन्धेन वहनं **कीदृशम्** / **कथाम्** आसीत् ?
29. **केन** / **कथं** संचलन् सायम् अभवत् ?
30. निशान्धकारे **का** न शुभावहा ?
31. सः **कया** / **किमर्थं** क्रन्दति स्म ?
32. **कौ** नदीजलं पातुम् आगतौ ?
33. **क:** देहविनाशाय प्रथम: शत्रु: ?
34. मूर्खाः **कै:** सह अनुव्रजन्ति ?
35. अमन्त्रम् **किं** नास्ति ?
36. **केषां** प्रथम: शत्रु: क्रोध: अस्ति ?
37. लव: कुश: च **कौ** आस्ताम् ?
38. बालभावात् हिमकर: **कुत्र** / **कस्मिन्** विराजते ?
39. मां **कुत्र** / **कस्मिन्** बद्ध्वा चल सत्वरम् ?
40. **क:** श्रृगालेन सह पुन: आगच्छत् ?
41. पाषाणीसभ्यतायां **के** प्रस्तरतले पिष्टा: भवन्ति ?
42. चक्रं सदा **कथं** / **कीदृशं** भ्रमति ?
43. भवता भीमभानौ निदाघे **कया** पुष्टि: व्यरचि ?
44. मनुष्य: आत्मन: **किम्** इच्छति ?
45. तत्तनय: **किमर्थं** / **कस्मै** छात्रावासे वसति स्म ?
46. दुर्बलसुते **कस्या:** अत्यधिका कृपा ?
47. अहम् अत्र भवतो: **कं** नामतो वेदितुमिच्छामि ?
48. **कं** निजगले बद्ध्वा चल सत्वरम् ?
49. पाषाणीसभ्यतायाम् लतातरुगुल्मा: **कुत्र** / **कस्मिन्** पिष्टा: भवन्ति ?
50. **कौ** व्याघ्रभक्षणाय कलहं कुरुतः ?



# अन्वयलेखनम्
# भावार्थलेखनम्

# **अन्वयः भावार्थः च**

**(अ) अन्वयः**

अन्वयः नाम कः ?

वयं पद्यानि (पद्यानि - श्लोकाः / सुभाषितानि / काव्यस्य अंशाः) पठामः। पद्यानां रचनायां सौन्दर्यवर्धनाय छन्दोनियमस्य अनुसरणाय च शब्दाः इतस्ततः सुस्थापितानि भवन्ति । तेषां शब्दानां क्रमानुसारं व्यवस्थापनमेव अन्वय: कथ्यते । अथवा पद्ये स्थितानां शब्दानां सामान्यवाक्यस्य इव क्रमीकरणम् एव अन्वयः भवति। अर्थात् सामान्यवाक्ये कर्तुः विशेषणानि अनन्तरं कर्तृपदं पुनः कर्मपदस्य विशेषणं तदनन्तरं कर्मपदं पुनः क्रियाविशेषणं तदनन्तरं क्रिया इति क्रमेण लेखनम् एव अन्वय: इति कथ्यते )

**सरलरीत्या अन्वयं कथं वयं कर्तुं शक्नुमः -**

**उदाहरणम् - 1**

प्रश्नः - 1 **आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।**

| शरीरस्थः, अवसीदति, बन्धुः, आलस्यम् |
|---|

<u>अन्वयः</u> - मनुष्याणां .................. महान् रिपुः .................. हि (अस्ति)
उद्यमसमः ................. नास्ति। यं कृत्वा (मानवः) न .................।

Step 1 : सर्वप्रथमं श्लोके सन्धिविच्छेदं कर्तुं प्रयत्नं कुर्मः -

प्रश्नः - 1 आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः।
नास्ति उद्यमसमः बन्धुः कृत्वा यं न अवसीदति।।

Step 2 : सन्धिविच्छेदस्य अनन्तरं वयम् अन्वये विद्यमानानि पदानि श्लोकतः निष्कासयामः। तद्यथा –

प्रश्नः - 1 आलस्यं ~~हि मनुष्याणां~~ शरीरस्थः ~~महान् रिपुः~~।
~~नास्ति उद्यमसमः~~ बन्धुः ~~कृत्वा~~ ~~यं~~ ~~न~~ अवसीदति।।

| शरीरस्थः, अवसीदति, बन्धुः, आलस्यम् |
|---|

<u>अन्वयः</u> - मनुष्याणां .................. महान् रिपुः .................. हि (अस्ति)
उद्यमसमः ................. नास्ति। यं कृत्वा (मानवः) न .................।

यदा वयं एवंविधं कर्तनं कुर्मः तदा चत्वारि पदानि अवशिष्टानि भवन्ति। तानि च - आलस्यं, शरीरस्थः, बन्धुः, अवसीदति। (यदि वयम् एवं प्रकारेण विकल्पान् तान् क्रमेण यदा लिखामः तदा तत् सामान्यतः 90 प्रतिशतम् उत्तरं भविष्यति। तस्य उदाहरणम् अधः दीयते) अस्माकं कृते ये विकल्पाः प्राप्ताः तान् पश्यन्तु। समानानि पदानि एव विकल्पेषु अपि सन्ति। इदानीम् अन्वयं पश्यामः ।

अन्वयः - मनुष्याणां **शरीरस्थः** महान् रिपुः **आलस्यं** हि (अस्ति)
उद्यमसमः **बन्धुः** नास्ति। यं कृत्वा (मानवः) न **अवसीदति** ।

(इदम् अवगन्तव्यं यत् अन्वये कोष्ठकान्तर्गतानि पदानि (अस्ति/मानवः) वाक्यपूर्तये स्वीकृतानि सन्ति इति।)

**उदाहरणम् - 2**

**सम्पत्तौ च विपत्तौ च महतामेकरूपता।**
**उदये सविता रक्तः रक्तश्चास्तमये तथा ॥**

| उदये, सम्पत्तौ, रक्तः, एकरूपता |
|---|

अन्वयः - महतां .................. च विपत्तौ च .................. । सविता
.................. रक्तः तथा अस्तमये च .................. (भवति)।

Step 1 : सर्वप्रथमं श्लोके सन्धिविच्छेदं कर्तुं प्रयत्नं कुर्मः -

प्रश्नः - 1 सम्पत्तौ च विपत्तौ च महताम् एकरूपता।
उदये सविता रक्तः रक्तः च अस्तमये तथा ॥

Step 2 : सन्धिविच्छेदस्य अनन्तरं वयम् अन्वये विद्यमानानि पदानि श्लोकतः निष्कासयामः। तद्यथा –

प्रश्नः - 1 सम्पत्तौ ~~च विपत्तौ च~~ ~~महताम्~~ एकरूपता।
उदये ~~सविता~~ ~~रक्तः~~ रक्तः ~~च~~ ~~अस्तमये तथा~~ ॥

| उदये, सम्पत्तौ, रक्तः, एकरूपता |
|---|

अन्वयः - महतां .................. च विपत्तौ च .................. । सविता
.................. रक्तः तथा अस्तमये च .................. (भवति)।

* अवशिष्टानि पदानि – सम्पत्तौ, एकरूपता, उदये, रक्तः
(एतत् एव उत्तरम्, परिशोधयन्तु)

**उत्तरम्** - महतां **सम्पत्तौ** च विपत्तौ च **एकरूपता** । सविता **उदये** रक्त: तथा अस्तमये च **रक्त:** (भवति)।

* किन्तु सम्यक् मनसि धारणीयं यत् 10 प्रतिशतं श्लोकेषु एषः उपायः न चलति इति। अतः अस्माभिः अन्वयं पूरयित्वा अर्थः समीचीनः एव वा इति द्रष्टव्यम्।

* विशेषनिर्देशः - कदाचित् अस्मिन् वर्षे अन्वयः विकल्पात्मक-प्रश्नः न स्यात्। अतः उपरि निर्दिष्टा प्रक्रिया अस्माभिः आश्रयणीया भवति ।

**(आ) भावार्थः**

भावार्थः नाम कः ?

श्लोकस्य / सुभाषितस्य अर्थस्य लेखनम् एव भावार्थः इति उच्यते। अत्र इतस्ततः विद्यमानानां शब्दानां क्रमीकरणेन अर्थस्य कथनम् एव भावार्थः कथ्यते। तन्नाम श्लोके विद्यमानानां पदानां समानार्थकपदेन सह, यत्र यत्र विवरणं प्रदेयं तेनापि युक्तं वाक्यं च भवति भावार्थः नाम। भावार्थलेखने प्रश्नेन सह विकल्पाः सामान्यतः वयं प्राप्नुमः।

**यां रीतिं वयं अन्वये अनुसृतवन्तः, तां रीतिं भावार्थे अपि कर्तुं शक्नुमः वा इति पश्यामः -**

**उदाहरणम् - 1**

**प्रश्नः - 1** **अवक्रता यथा चित्ते तथा वाचि भवेत् यदि ।**
**तदेवाहु: महात्मान: समत्वमिति तथ्यत:।।**

| महाजनाः, अकथयन्, मनसि, चित्ते |
|---|

भावार्थः - यथा .................. अवक्रता वर्तते तथा .................. अपि अस्ति चेत् .................. तं समत्वं इति ..................।।

Step 1 : सर्वप्रथमं श्लोके सन्धिविच्छेदं कर्तुं प्रयत्नं कुर्मः -

प्रश्नः - 1 अवक्रता यथा चित्ते तथा वाचि भवेत् यदि ।
तत् एव आहुः महात्मान: समत्वम् इति तथ्यत:।।

Step 2 : सन्धिविच्छेदस्य अनन्तरं वयम् भावार्थे विद्यमानानि पदानि श्लोकतः निष्कासयामः। तद्यथा –

प्रश्नः - 1 ~~अवक्रता~~ ~~यथा~~ चित्ते ~~तथा~~ वाचि ~~भवेत्~~ ~~यदि~~ ।
~~तत्~~ ~~एव~~ आहुः महात्मान: समत्वम् इति ~~तथ्यत:~~।।

| महाजनाः, अकथयन्, मनसि, वचने |
|---|

भावार्थः - यथा .................. अवक्रता वर्तते तथा .................. अपि अस्ति चेत् तत् एव वास्तविकरूपेण .................. समत्वम् इति ..................।

किन्तु एवं पदानि निष्कासनीयानि तर्हि समीचीनतया श्लोकानाम् अर्थस्य ज्ञानम् आवश्यकम्। चत्वारि पदानि अवशिष्टानि सन्ति। तानि च - चित्ते, वाचि, आहुः, महात्मानः। विकल्पे विद्यमानैः समानार्थपदैः सह मेलयामः। चित्ते = मनसि, वाचि = वचने, आहुः = अकथयन्, महात्मानः = महाजनाः।

* अतः भावार्थे अपि उपरि दत्ता प्रक्रिया युज्यते।

**<u>इदानीम् एकैकं पाठं स्वीकृत्य अन्वयानां भावार्थानां च परिचयं प्राप्नुमः।</u>**

## <u>प्रथमः पाठः - शुचिपर्यावरणम्</u>

**अन्वयं भावार्थं च लिखत।**

**श्लोकः - 1**

**दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।**
**शुचि-पर्यावरणम्॥**
**महानगरमध्ये चलदनिशं कालायसचक्रम्।**
**मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम्॥**
**दुर्दान्तैर्दशनैरमुना स्यान्नैव जननसनम्॥**

<u>अन्वयः</u> - अत्र जीवितं दुर्वहं जातम्। शुचि पर्यावरणं (भवेत्)। महानगरमध्ये अनिशं चलत् कालायसचक्रं मनः शोषयत् तनुः पेषयत् सदा वक्रं भ्रमति। अमुना दुर्दान्तैः दशनैः जनग्रसनं न एव स्यात्।

<u>भावार्थः</u> - अत्र लोके जीवितं कठिनं जातम् अस्ति। शुद्धं पर्यावरणं स्यात्। महानगराणां मध्ये अहर्निशं चलत् कालायसचक्रं मानसं शोषयत् शरीरं पेषयत् सर्वदा वक्रं भमति। एतैः दुर्दान्तैः मानवानां विनाशः न भवेत्।

**श्लोकः - 2**

**कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।**
**वाष्पयानमाला संधावति वितरन्ती ध्वानम्॥**
**यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्॥**

<u>अन्वयः</u> - शतशकटीयानं कज्जलमलिनं धूमं मुञ्चति। ध्वानं वितरन्ती वाष्पयानमालाः संधावति। यानानाम् अनन्ताः पङ्क्तयः हि। संसरणं कठिनम्।

भावार्थः - शतशः यन्त्रशकटानि कज्जलम् इव मलिनं धूमं मुञ्चति । रवं वितरन्ती धूमशकटानि संधावन्ति । वाहनानाम् अनन्ताः पङ्क्तयः सन्ति । सञ्चलनं कठिनं संजातम् अस्ति ।

**श्लोकः - 3**

**वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।**
**कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ॥**
**करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् ॥**

अन्वयः - (अत्र) वायुमण्डलं भृशं दूषितं, निर्मलं जलं (अपि) न (अस्ति), भक्ष्यं च कुत्सितवस्तुमिश्रितं (वर्तते), धरातलं समलं हि । अन्तः बहिः (च) बहु शुद्धीकरणं करणीयम् ।

भावार्थः - अस्मिन् नगरे वायुमण्डलं बहु दूषितं अस्ति। शुद्धं जलम् अपि नास्ति। भक्ष्यं च कुत्सितवस्तुमिश्रितं वर्तते। अपि च धरातलं समलं जातम् अस्ति। अतः अन्तः बहिः च बहु शुद्धीकरणं करणीयम् अस्ति।।

**श्लोकः - 4**

**कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम् ।**
**प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम् ॥**
**एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम् ॥**

अन्वयः - कञ्चित् कालं माम् अस्मात् नगरात् बहुदूरं नय । ग्रामान्ते निर्झर-नदी-पयःपूरं प्रपश्यामि । एकान्ते कान्तारे क्षणम् अपि मे सञ्चरणं स्यात् ।

भावार्थः - त्वं कञ्चित् कालं माम् अस्मात् नगरात् बहुदूरं नय । ग्रामस्य अन्ते निर्झराणां नदीनां च तडागं च पश्यामि । एकान्ते वने किञ्चित् कालं मम संचरणं स्यात् ।

**श्लोकः - 5**

**हरिततरुणां ललितलतानां माला रमणीया ।**
**कुसुमावलिः समीरचालिता स्यान्मे वरणीया ॥**
**नवमालिका रसालं मिलिता रुचिरं संगमनम् ॥**

अन्वयः - हरिततरूणां ललितलतानां माला रमणीया । समीरचालिता कुसुमावलिः मे वरणीया स्यात् । नवमालिका रसालं मिलिता । (तयोः) संगमनं रुचिरम् ।

भावार्थः - हरिततरूणां ललितानां लतानं च माला रमणीया अस्ति। समीरेण चालिता कसुमानाम् आवलिः मे वरणीया स्यात्। कुसुमिता नवमालिका आम्रैः सह मिलिता। आम्रवृक्षस्य नवमालिकायाः च संगमनं अतीव रुचिप्रदं वर्तते।

**श्लोकः - 6**

**अयि चल बन्धो! खगकुलकलरवगुञ्जितवनदेशम्।**
**पुरकलरवसम्भ्रमितजनेभ्यो धृतसुखसन्देशम्॥**
**चाकचिक्यजालं नो कुर्याज्जीवितरसहरणम्॥**

अन्वयः - अयि बन्धो! (त्वं) खगकुल-कलरव-गुञ्जित-वनप्रदेशं चल। पुर-कलरव-संभ्रमति-जनेभ्यः धृतसुखसन्देशं , चाकचिक्यजालं जीवितरसहरणं न कुर्यात्॥

भावार्थः - हे बन्धो! त्वं पक्षिणां समूहस्य कलरवैः गुञ्जितं वनप्रदेशं गच्छ। नगरे विद्यमानैः शब्दकोलाहलैः संभ्रमितजनेभ्यः जीवने सुखसन्देशं देहि। नगरस्य चाकचिक्य-जालं जीवितस्य रसहरणं न कुर्यात्।

**श्लोकः - 7**

**प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः।**
**पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा॥**
**मानवाय जीवनं कामये नो जीवन्मरणम्॥**

अन्वयः - लतातरुगुल्माः प्रस्तरतले पिष्टाः नो भवन्तु। निसर्गे पाषाणी सभ्यता समाविष्टा न स्यात्। मानवाय जीवनं कामये जीवन्मरणं न (कामये)।

भावार्थः - लताः वृक्षाः सस्यानि च पाषाणानां तले पिष्टाः न भवन्तु। प्रकृत्यां पाषाणी संस्कृतिः समाविष्टा न भवेत्। मानवाय जीवनं कामये, न तु जीवन्मरणम्।

## द्वितीयः पाठः – बुद्धिर्बलवती सदा

**श्लोकः - 1**

**निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।**
**अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्॥**

अन्वयः - सा भामिनी निजबुद्ध्या व्याघ्रस्य भयात् विमुक्ता (अभवत्)। अन्यः बुद्धिमान् अपि लोके महतः भयात् मुच्यते।

भावार्थः - सा स्त्री स्वबुद्धिशक्त्या व्याघ्रस्य भयात् विमुक्ता जाता। अन्यः बुद्धिमान् जनः अपि अस्मिन् लोके एवमेव स्वबुद्ध्या महतो भयात् मुच्यते।

**श्लोकः - 2**

**रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।**
**विश्वास्याद्यैकमानीय कथं यासि वदाधुना ।।**
**इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा।**
**व्याघ्रोऽपि सहसा नष्टः गलबद्धशृगालकः ।।**

अन्वयः - रे रे धूर्त! पुरा त्वया मह्यं व्याघ्रत्रयं दत्तम्। विश्वास्य अद्य एकम् आनीय कथं यासि इति अधुना वद। इति उक्त्वा भयङ्करा व्याघ्रमारी तूर्णं धाविता। गलबद्ध-शृगालकः व्याघ्रः अपि सहसा नष्टः। हे तन्वि! सर्वदा सर्वकार्येषु बुद्धिः बलवती।

भावार्थः - हे धूर्त! त्वं मह्यं पुरा व्याघ्रत्रयं दत्तवान्। किन्तु विश्वासं दत्त्वा अपि अद्य एकं व्याघ्रम् आनीय कथं गच्छसि इति इदानीं त्वं वद - इति उक्त्वा भीकरा व्याघ्रमारी शीघ्रं धावितवती। गलबद्धशृगालकः व्याघ्रः अपि सहसा विनष्टः जातः। हे तन्वि! सर्वदा सर्वेषु कार्येषु बुद्धिः बलवती भवति।

## तृतीयः पाठः - शिशुलालनम्

**श्लोकः - 1**

**भवति शिशुजनो वयोऽनुरोधाद्**
**गुणमहतामपि लालनीय एव।**
**व्रजति हिमकरोऽपि बालभावात्**
**पशुपति-मस्तक-केतकच्छदत्वम् ।।**

अन्वयः - शिशुजनः वयोऽनुरोधात् गुणमहताम् अपि लालनीयः एव भवति। (यथा) हिमकरः अपि बालभावात् पशुपति-मस्तक-केतकच्छदत्वम् व्रजति।

भावार्थः - यथा चन्द्रः अपि भगवतः शंकरस्य मस्तके केतकस्य पुष्पवत् स्वकीय-बालस्वभावात् उपविशति तथा कोऽपि बालकः वयसः कारणात् गुणैः महतां जनानां लालनीयः एव भवति।

**श्लोकः - 2**

**भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधिर्**
**गिरां सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम्।**
**कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं**
**पुनाति श्रोतारं रमयति च सोऽयं परिकरः ।।**

अन्वय: - भवन्तौ गायन्तौ (स्तः), कविः अपि पुराणः व्रतनिधिः (अस्ति), अयं गिरां सन्दर्भः प्रथमं वसुमतीम् अवतीर्ण:, इयं सरसीरुहनाभस्य कथा श्लाघ्या च , सः च अयं परिकरः नियतं श्रोतारं पुनाति रमयति च ।

भावार्थ: - भवन्तौ लवकुशकुमारौ गायन्तौ स्तः, अस्य काव्यस्य कर्ता कविः अपि पुराणः व्रतनिधिः च अस्ति । अयं गिरां संदर्भ: प्रथमं वसुमतीम् अवतीर्ण: । महाविष्णोः इयं कथा श्लाघनीया एव । अयं परिकरः च निश्चयेन श्रोतारं पवित्रीकरोति सन्तोषयति च ।

## <u>चतुर्थः पाठः - जननी तुल्यवत्सला</u>

**श्लोक: - 5**

**विनिपातो न वः कश्चिद् दृश्यते त्रिदशाधिप! ।**
**अहं तु पुत्रं शोचामि, तेन रोदिमि कौशिक! ।।**

<u>अन्वय:</u> - हे त्रिदशाधिप! वः विनिपातः कश्चित् न दृश्यते । अहं तु पुत्रं शोचामि । हे कौशिक! तेन रोदिमि ।

<u>भावार्थ:</u> - हे देवेन्द्र, अस्माकं विनाशः केनापि न दृश्यते । अहं तु मम पुत्रं दृष्ट्वा दुःखिता अस्मि । हे इन्द्र! तेन कारणेन अहं रोदिमि ।

**श्लोक: - 6**

**यदि पुत्रसहस्रं मे, सर्वत्र सममेव मे ।**
**दीनस्य तु सतः शक्र! पुत्रस्याभ्यधिका कृपा ।।**

<u>अन्वय:</u> - यदि (अपि) मे पुत्रसहस्रं (अस्ति) (तथापि) सर्वत्र मे समम् एव। हे शक्र! दीनस्य पुत्रस्य सतः तु (मातुः) अभ्यधिका कृपा (भवति) ।

<u>भावार्थ:</u> - यद्यपि मम सहस्रं पुत्राः सन्ति तथापि सर्वेषु पुत्रेषु मम समाना प्रीतिः अस्ति । हे इन्द्र! किन्तु दीने पुत्रे तु मातुः अधिका कृपा संभवति ।

## <u>षष्ठः पाठः - सुभाषितानि</u>

**अन्वयं भावार्थं च लिखत ।**

**श्लोक: - 1**

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।**

अन्वय: - मनुष्याणां शरीरस्थ: महान् रिपु: आलस्यं हि (अस्ति) । उद्यमसम: बन्धु: नास्ति। यं कृत्वा (मानव:) न अवसीदति ।

भावार्थ: - मनुष्याणां शरीरे स्थित: महान् शत्रु: अलसता एव। परिश्रमसमानम् मित्रं नास्ति। परिश्रमं कृत्वा नरा: दु:खिता: न भवन्ति ।

**श्लोक: - 2**

**गुणी गुणं वेत्ति न वेत्ति निर्गुण:। बली बलं वेत्ति न वेत्ति निर्बल: ।**
**पिको वसन्तस्य गुणं न वायस:। करी च सिंहस्य बलं न मूषक:।।**

अन्वय: - गुणी गुणं वेत्ति, निर्गुण: न वेत्ति । बली बलं वेत्ति, निर्बल: न वेत्ति । पिक: वसन्तस्य गुणं वेत्ति, वायस: न वेत्ति । करी च सिंहस्य बलं (वेत्ति) मूषक: न वेत्ति ।

भावार्थ: - गुणवान् गुणस्य महत्त्वं जानाति। निर्गुण: मनुष्य: गुणस्य महत्त्वं न जानाति। बलवान् बलस्य महत्त्वं जानाति, निर्बलः मनुष्यः बलस्य महत्त्वं न जानाति। कोकिल: वसन्तस्य महत्वं जानाति, काक: वसन्तस्य महत्वं न जानाति। गज: सिंहस्य बलं जानाति, मूषक: न जानाति ।

**श्लोक: - 3**

**निमित्तमद्दिश्य य: प्रकुप्यति ध्रुवं स: तस्यापगमे प्रसीदति।**
**अकारणद्वेषिमनस्तु यस्य वै कथं जनस्तं परितोषयिष्यति।।**

अन्वय: - य: निमित्तं उद्दिश्य प्रकुप्यति, ध्रुवं स: तस्य अपगमे प्रसीदति। यस्य मन: अकारणद्वेषि (अस्ति) सः जन: तं कथं परितोषयिष्यति ।

भावार्थ: - य: मनुष्य: कारणवशात् क्रुद्ध: भवति स: तस्य कारणस्य निवारणेन सन्तुष्ट: भविष्यति। किन्तु य: कारणं विना क्रुद्ध: भवति, तं सन्तुष्टं कर्तुं कोऽपि न शक्नोति ।

**श्लोक: - 4**

**उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति बोधिता:।**
**अनुक्तमप्यूहति पण्डितो जन: परेङ्गितजानफला: हि बुद्धय:।।**

अन्वय: - पशुना अपि उदीरित: अर्थ: गृह्यते। हया: च नागा: च बोधिता: वहन्ति। पण्डित: जन: अनुक्तम् अपि ऊहति। परेङ्गितजानफला: हि बुद्धय: ।

भावार्थ: - उदीरितं अर्थं पशु: अपि जानाति। अश्वा: गजा: च मार्गदर्शनेन भारं वहन्ति। पण्डित: जन: अकथितं अर्थं अपि ऊहति। बुद्धिमान् जन: अन्येषां हृदयभावमपि जानाति।

**श्लोक: - 5**

**क्रोधो हि शत्रु: प्रथमो नराणां देहस्थितो देहविनाशनाय।**
**यथास्थित: काष्ठगतो हि वह्नि: स एव वह्निर्दहते शरीरम्॥**

अन्वय: - नराणां देहविनाशनाय प्रथम: शत्रु: देहस्थित: क्रोध: हि। यथा काष्ठगत: स्थित: वह्नि: काष्ठं दहते (तथा) एव (शरीरस्थित:) स: (क्रोध:) शरीरं (दहते)।

**श्लोक: - 6**

**मृगा: मृगै: सङ्गमनुव्रजन्ति, गावश्च गोभि: तुरगास्तुरङ्गै:।**
**मूर्खाश्च मूर्खै: सुधिय: सुधीभि: ,समानशीलव्यसनेषु सख्यम्।**

अन्वय: - मृगा: मृगै: सह, गावश्च गोभि: सह, तुरगा: तुरङ्गै:: सह, मूर्खा: च मूर्खै: सह, सुधिय: सुधीभि: सह, सङ्गं अनुव्रजन्ति। समानशील-व्यसनेषु सख्यं (भवति)।

भावार्थ: - मृगा: मृगै: सह, गावश्च गोभि:, तुरगा: तुरङ्गै:, मूर्खा: च मूर्खै: सह, सुधिय: सुधीभि: सह मैत्रीं स्थापयन्ति। समानशीलव्यसनेषु मित्रता भवति।

**श्लोक: - 7**

**सेवितव्यो महावृक्ष: फलच्छायासमन्वित:।**
**यदि दैवात् फलं नास्ति छाया केन निवार्यते॥**

अन्वय: - फलच्छायासमन्वित: महावृक्ष: सेवितव्य:। यदि दैवात् फलं नास्ति छाया केन निवार्यते।

भावार्थ: - फलेन छायया च सहित: महावृक्ष: आश्रययोग्य: अस्ति। दैवात् (भाग्यात्) फलं नास्ति चेत् अपि छाया केन निवारयितुं शक्यते।

**श्लोक: - 8**

**अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्।**
**अयोग्य: पुरुषो नास्ति योजकस्तत्र दुर्लभ:।।**

अन्वय: - अमन्त्रम् अक्षरं नास्ति, अनौषधं मूलं नास्ति, अयोग्य: पुरुष: नास्ति, योजक: तत्र दुर्लभ: (अस्ति)।

भावार्थ: - मन्त्ररहितं अक्षरं नास्ति, औषधरहितं मूलमपि नास्ति अयोग्य: जन: अपि नस्ति। योजका: दुर्लभा: सन्ति।

**श्लोक: - 9**

**सम्पत्तौ च विपत्तौ च महतामेकरूपता।**
**उदये सविता रक्त: रक्तश्चास्तमये तथा ।।**

अन्वय: - महतां सम्पत्तौ च विपत्तौ च एकरूपता। यथा सविता उदये रक्त: तथा अस्तमये च रक्त: (भवति)।

भावार्थ: - यथा सूर्य: उदयसमये अरुण: अस्तसमये च अरुण: एव अस्ति तथा महाजनानां सम्पन्नतायां तथा विपन्नतायां समानरूपता वर्तते।

**श्लोक: - 10**

**विचित्रे खलु संसारे नास्ति किंचिन्निरर्थकम्।**
**अश्वश्चेद् धावने वीर: भारस्य वहने खर: ।।**

अन्वय: - विचित्रे संसारे खलु किंचित् निरर्थकं नास्ति। अश्व: चेत् धावने वीर:, खर: भारस्य वहने (वीर: अस्ति)।

भावार्थ: - अस्मिन् संसारे किमपि अर्थशून्यं नास्ति। अश्व: धावने उपयुक्त: अस्ति। गर्दभ: च भारवहने च उपयुक्त: अस्ति।

## सप्तम: पाठ: - सौहार्द्रं प्रकृते: शोभा

**श्लोक: - 1**

**यो न रक्षति वित्रस्तान् पीड्यमानान् परै सदा।**
**जन्तून् पर्थिवरूपेण स कृतान्तो न संशय:।।**

अन्वय: - य: परै: वित्रस्तान् पीड्यमानान् जन्तून् पर्थिवरूपेण न रक्षति, स कृतान्त:, संशय: न।

भावार्थः - य: राजा शत्रुभि: पीडितान् भयाकुलान् जनान् न रक्षति, स: जनानां कृते यमराज: भवति ।

**श्लोक: - 2**

**काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो:।**
**वसन्तसमये प्राप्ते काक: काक: पिक: पिक:॥**

अन्वय: - काक: कृष्ण:, पिक: कृष्ण:, पिककाकयो: क: भेद:? वसन्तसमये प्राप्ते, काक: काक: (अस्ति) पिक: पिक: (अस्ति) ।

भावार्थ: - काक: कृष्णवर्ण: अस्ति। कोकिल: अपि कृष्णवर्ण: अस्ति। किन्तु वसन्तकाले काकस्य विशेषता नास्ति, किन्तु कोकिल: मधुरं गायति ।

**श्लोक: - 3**

**यदि न स्यात् नरपति: सम्यक् नेता तत: प्रजा ।**
**अकर्णधाराजलधौ विप्लवेतेह नौरिव ।।**

अन्वय: - यदि नरपति: सम्यक् नेता न स्यात्, तत: प्रजा अकर्णधारा नौः इव इह जलधौ विप्लवेत् ।

भावार्थ: - यदि राजा उत्तमः शासनकर्ता नास्ति तर्हि जना: , नाविकरहिता नौका इव समुद्रजले नश्यति ।

**श्लोक: - 4**

**स्वभावरौद्रमत्युग्रं क्रूरमप्रियवादिनम्।**
**उलूकं नृपतिं कृत्वा का नु सिद्धिर्भविष्यति।।**

अन्वय: - स्वभावरौद्रं अत्युग्रं क्रूरं अप्रियवादिनम् उलूकं नृपतिं कृत्वा का नु सिद्धिः भविष्यति ?

भावार्थ: - स्वभवेन भयानकं दयाहीनं अप्रियवादिनं उलूकं राजानं कृत्वा का सफलता भविष्यति ?

**श्लोक: - 5**

**ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।**
**भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्।।**

अन्वय: - ददाति, प्रतिगृह्णाति ,गुह्यम् आख्याति, पृच्छति, भुङ्क्ते, भोजयते च षड्विधं एव प्रीतिलक्षणम् ।

भावार्थ: - ददाति, स्वीकरोति, रहस्यं वदति, पृच्छति, खादति भोजयते। एतानि षट् स्नेहस्य लक्षणानि भवन्ति ।

**श्लोक: - 6**

**प्रजासुखे सुखं राज्ञ: प्रजानां च हिते हितम्।**

**नात्मप्रियं हितं राज्ञ: प्रजानां तु प्रियं हितम्।।**

अन्वय: - प्रजासुखे राज्ञ: सुखं प्रजानां हिते च हितम्। आत्मप्रियं राज्ञ: हितं न, प्रजानां प्रियं तु हितम् ।

भावार्थ: - जनानां सुखे एव नृपस्य सुखं अस्ति। जनानां हिते एव नृपस्य हितम्। आत्मन: प्रियं नृपस्य हितकरं नास्ति। जनानां प्रियं एव नृपस्य हितकरम् ।

**श्लोक: - 7**

**अगाधजलसंचारी न गर्वं याति रोहित:।**

**अंगुष्ठोदकमात्रेण शफरी फुर्फुरायते।।**

अन्वय: - अगाधजलसंचारी रोहित: न गर्वं याति । अंगुष्ठोदकमात्रेण शफरी फुर्फुरायते ।

भावार्थः - गहने जले जीवमान: रोहितमत्स्य: गर्वित: नास्ति। किन्तु अंगुष्ठमात्रजले लघुमत्स्य: गर्वेण शब्दं करोति ।

**श्लोक: - 8**

**प्रणिनां जायते हानि: परस्परविवादत:।**

**अन्योन्यसहयोगेन लाभस्तेषां प्रजायते॥**

अन्वय: - परस्परविवादत: प्राणिनां हानि: जायते। अन्योन्यसहयोगेन तेषां लाभ: प्रजायते ।

भावार्थः - परस्परविवादेन जीविनां नाश: संभवति। अन्योन्य सहकरणेन सर्वेषां लाभ: भविष्यति।

..........................................................................................

# नवमः पाठः – सूक्तयः

**श्लोकः - 1**

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिता अस्य किम् तपस्तेपे इत्युक्तिस्तत्कृतज्ञता॥**

अन्वय: - पिता बाल्ये पुत्राय महत् विद्याधनं यच्छति। अस्य पिता कि तप: तेपे इति उक्ति: तत्कृतज्ञता।

भावार्थः - पिता बाल्यावस्थायां पुत्राय महत्त्वपूर्णं विद्याधनं यच्छति। अस्य पुत्रस्य पिता पुत्राय महतीं तपस्यां अकरोत्" इति वचनं अपि तत्कृतज्ञता भवति।

**श्लोकः - 2**

**अवक्रता यथा चित्ते तथा वाचि भवेत् यदि।**
**तदेवाहु: महात्मान: समत्वमिति तथ्यत:॥**

अन्वय: - यथा अवक्रता चित्ते तथा वाचि यदि भवेत् महात्मान: तदेव तथ्यत: समत्वं इति आहु:।

भावार्थः - यथा मनसि अवक्रता वर्तते तथा वचने अपि अस्ति चेत् महाजना: तं समत्वं इति अकथयन्।

**श्लोकः - 3**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलम् पक्वं भुङ्क्तेऽपक्वं विमूढधी:॥**

अन्वय: - य: धर्मप्रदां वाचं त्यक्त्वा परुषां अभ्युदीरयेत् (स:) विमूढधी: पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते।

भावार्थः - य: नर: धर्मसहितवचनानि परित्यज्य कठिनं वचनं वदति, स: मूर्ख: इव पक्वं फलं परित्यज्य अपक्वं फलं खादति।

**श्लोकः - 4**

**विद्वांस: एव लोके अस्मिन् चक्षुष्मन्त: प्रकीर्तिता:।**
**अन्येषां वदने ये तु ते चक्षुर्नामनी मते॥**

अन्वय: - अस्मिन् लोके विद्वांस: एव चक्षुष्मन्त: प्रकीर्तिता:। अन्येषां वदने ये ते तु चक्षुर्नामनी मते।

भावार्थः - अस्मिन् लोके पण्डिता: जना: नेत्रसहिता: इति प्रकीर्तिता:। अन्येषां जनानां मुखे ये नेत्रे स्त: ते नाममात्रेण नेत्रे एव भवतः॥

**श्लोक: - 5**

**यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णय:।**
**कर्तुं शक्यो भवेद्येन स: विवेक: इतीरित:।।**

अन्वय: - येन केन अपि यत् प्रोक्तं तस्य तत्त्वार्थस्य निर्णय: येन कर्तुं शक्य: भवेत् स: विवेक: इति ईरित:।।

भावार्थः - येन केनापि यत् किमपि उक्तं तस्य यथार्थ-अर्थस्य निर्णय: येन क्रियते स: "विवेक:" इति कथ्यते।।

**श्लोक: - 6**

**वाक्पटुर्धैर्यवान् मन्त्री सभयामप्यकातर:।**
**स: केनापि प्रकारेण परैर्न परिभूयते।।**

अन्वय: - (य:) मन्त्री वाक्पटु: धैर्यवान् सभायां अपि अकातर: (अस्ति) स: परै: केन अपि प्रकारेण न परिभूयते ।

भावार्थः - य: मन्त्री भाषणे चतुर:, धैर्यशाली सभायां भयरहित: अस्ति स: अन्यै: पराजित: न भवति ।

**श्लोक: - 7**

**य: इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च।**
**न कुर्यदहितं कर्म स परेभ्य: कदापि च।।**

अन्वय: - य: आत्मन: श्रेय: प्रभूतानि सुखानि च इच्छति स: परेभ्यः अहितं कर्म कदापि न कुर्यात् ।

भावार्थः - य: मनुष्य: आत्मन: प्रगतिं तथा बहु सुखं च इच्छति स: अन्येभ्य: दूषितं कार्यं न कुर्यात् ।

**श्लोक: - 8**

**आचार: प्रथमो धर्म: इत्येतत् विदुषां वच:।**
**तस्मात् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत:।।**

अन्वय: - आचार: प्रथम: धर्म: इति एतत् विदुषां वच:। तस्मात् प्राणेभ्य: अपि सदाचारं विशेषत: रक्षेत् ।

भावार्थः - आचार: प्रथम: धर्म: अस्ति, एवं वदन्ति विद्वांसः जना: । अत: प्राणेभ्य: अपि विशेषरूपेण सदाचार: संरक्षणीय: ।

# द्वादशः पाठः - अन्योक्तयः

**श्लोकः - 1**

**एकेन राजहंसेन या शोभा सरसो भवेत्।**
**न सा बकसहस्रेण परितस्तीरवासिना।।**

अन्वयः - एकेन राजहंसेन सरसः या शोभा भवेत्, परितः तीरवासिना बकसहस्रेण सा (शोभा) न (भवति) ।।

भावार्थः - एकस्य राजहंसस्य सहवासेन तडागस्य (नद्याः) या शोभा भवेत्, सा शोभा तडागं परितः विद्यमानैः बकसहस्रेण संभवः नास्ति।

**श्लोकः - 2**

**भुक्ता मृणालपटली भवता निपीता**
**न्यम्बूनि यत्र नलिनानि निषेवितानि।**
**रे राजहंस! वद तस्य सरोवरस्य,**
**कृत्येन केन भवितासि कृतोपकारः।।**

अन्वयः - यत्र भवता मृणालपटली भुक्ता, अम्बूनि निपीतानि नलिनानि निषेवितानि, रे राजहंस! तस्य सरोवरस्य केन कृत्येन कृतोपकारः भविता असि, वद ।

भावार्थः - यत्र भवता कमलनालानां समूहं खादिता, जलं पीतं, कमलानि खादितानि, हे राजहंस! तस्य तडागस्य केन कर्मणा त्वं प्रत्युपकारं करिष्यसि, वद ।

**श्लोकः - 3**

**तोयैरल्पैरपि करुणया भीमभानौ निदाघे,**
**मालाकार! व्यरचि भवता या तरोरस्य पुष्टिः।**
**सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां,**
**धारासारानपि विकिरता विश्वतो वारिदेन।।**

अन्वयः - हे मालाकार! भीमभानौ निदाघे अल्पैः तोयैः अपि भवता करुणया अस्य तरोः या पुष्टिः व्यरचि, वारां प्रावृषेण्येन विश्वतः धारासारान् अपि विकिरता वारिदेन इह जनयितुं सा (पुष्टिः) किं शक्या।।

भावार्थ: - हे उद्यानपालक! अतिग्रीष्मकाले अल्पेन जलेन अपि करुणया अस्य वृक्षस्य यत् पोषणं त्वया कृतम्, वर्षाकाले परितः जलानां प्रवर्षणेन जलधारान् अपि विकिरता तेन मेघेन अत्र सा पुष्टिः कर्तुं शक्या किम्?

**श्लोक: - 4**

**आपेदिरेऽम्बरपथं परितः पतङ्गाः,**
**भृङ्गा रसालमुकुलानि समाश्रयन्ते।**
**सङ्कोचमञ्चति सरस्त्वयि दीनदीनो,**
**मीनो नु हन्त कतमां गतिमभ्युपैतु॥**

अन्वय: - पतङ्गाः परितः अम्बरपदम् आपेदिरे, भृङ्गाः रसालमुकुलानि समाश्रयन्ते । हे सरः! त्वयि सङ्कोचम् अञ्चति, हन्त दीनदीनः मीनः नु कतमां गतिम् अभ्युपैतु ।

भावार्थ: - पक्षिणः परितः आकाशमार्गं प्राप्तवन्तः सन्ति। भ्रमराः आम्रपुष्पाणि समाश्रितानि सन्ति । हे सरोवर! त्वं यदा शुष्कतां याति तदा निराश्रितः दीनः च मीनः कतमां गतिं प्राप्नोतु ?

**श्लोक: - 5**

**एक एव खगो मानी वने वसति चातकः।**
**पिपासितो वा म्रियते याचते वा पुरन्दरम्॥**

<u>अन्वय:</u> - एकः एव मानी खगः चातकः वने वसति, वा पिपासितः म्रियते पुरन्दरं याचते वा ।

<u>भावार्थ:</u> - एकः एव स्वाभिमानी पक्षी चातकः वने वसति, यः पिपासितः सन् मरणं प्राप्नोति अथवा देवेन्द्रं वर्षाजलस्य याचनां करोति ।

**श्लोक: - 6**

**आश्वास्य पर्वतकुलं तपनोष्णतप्त**
**मुद्दामदावविधुराणि च काननानि।**
**नानानदीनदशतानि च पूरयित्वा,**
**रिक्तोऽसि जलद! सैव तवोत्तमा श्रीः॥**

अन्वयः - तपनोष्णतप्तं पर्वतकुलम् आश्वास्य उद्दामदावविधुराणि काननानि च (आश्वास्य) नानानदीनदशतानि पूरयित्वा च हे जलद! यत् रिक्तः असि तव सा एव उत्तमा श्रीः ।

भावार्थः - सूर्यतापेन तप्तं पर्वतानां समूहं आश्वास्य उन्नतवृक्षरहितानि वनानि आश्वास्य अनेक-नदीः तडागादीन् च जलैः पूरयित्वा च हे मेघ! त्वं रिक्तः जातः असि तस्याम् अवस्थायाम् अपि त्वं शोभते॥

**श्लोकः - 7**

**रे रे चातक! सावधानमनसा मित्र क्षणं श्रूयता-**
**मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।**
**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,**
**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥**

अन्वयः - रे रे मित्र चातक! सावधानमनसा क्षणं श्रूयताम्, गगने हि बहवः अम्भोदाः सन्ति, सर्वे अपि एतादृशाः न (सन्ति), केचित् धरणीं वृष्टिभिः आर्द्रयन्ति, केचित् वृथा गर्जन्ति, (त्वं) यं यं पश्यसि तस्य तस्य पुरतः दीनं वचः मा ब्रूहि॥

भावार्थः - हे हे मित्र चातक! सावहितमनसा क्षणं शृणुत, आकाशे निश्चयेन बहवः मेघाः सन्ति, सर्वे अपि ईदृशाः न सन्ति, केचित् भूमिं वृष्टिजलैः आर्द्रयन्ति, केचित् च वृथा शब्दघोषं कुर्वन्ति, त्वम् अपि यं यं पश्यसि तं तं स्वदीनकथां न श्रावय ॥

## अन्वयलेखनस्य अभ्यासार्थं प्रश्नाः

**प्रश्नः 1** **उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति बोधिताः ।**
**अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफलाः हि बुद्धयः ॥**

अन्वयः - पशुना अपि .................. अर्थः गृह्यते। हयाः च .................. च बोधिताः वहन्ति। पण्डितः जनः ............ अपि ऊहति। परेङ्गितज्ञानफलाः हि .......... ।

**प्रश्नः 2** **स्वभावरौद्रमत्युग्रं क्रूरमप्रियवादिनम्।**
**उलूकं नृपतिं कृत्वा का नु सिद्धिर्भविष्यति ॥**

अन्वयः - .................. अत्युग्रं क्रूरं .................. उलूकं नृपतिं .................. का नु सिद्धिः .................. ?

**प्रश्नः 3** **प्रणिनां जायते हानि: परस्परविवादत: ।**

**अन्योन्यसहयोगेन लाभस्तेषां प्रजायते ।।**

अन्वयः - परस्परविवादत: .................. हानि: ..................। अन्योन्यसहयोगेन .................. लाभ: .................. ।

**प्रश्नः 4** **पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**

**पिता अस्य किम् तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।**

अन्वयः - पिता बाल्ये .................. महत् विद्याधनं .................. । अस्य .................. कि तप: तेपे इति उक्ति: .................. ।

**प्रश्नः 5** **विद्वांस: एव लोके अस्मिन् चक्षुष्मन्त: प्रकीर्तिता: ।**

**अन्येषां वदने ये तु ते चक्षुर्नामनी मते ।।**

अन्वयः - अस्मिन् लोके .................. एव चक्षुष्मन्त: ..................। अन्येषां ..................ये ते तु .................. मते ।

**प्रश्नः 6** **य: इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च ।**

**न कुर्यदहितं कर्म स परेभ्य: कदापि च ।।**

अन्वयः - य: आत्मन: .................. प्रभूतानि सुखानि च .................. स: परेभ्यः अहितं .................. कदापि न .................. ।

## भावार्थलेखनस्य अभ्यासार्थं प्रश्नाः

**प्रश्नः 1** **काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो: ।**

**वसन्तसमये प्राप्ते काक: काक: पिक: पिक: ।।**

| कृष्णवर्णः, वसन्तकाले, कोकिलः, काकः |
|---|

भावार्थ: - ............... कृष्णवर्ण: अस्ति। कोकिल: अपि ............... अस्ति। किन्तु ............... काकस्य विशेषता नास्ति, किन्तु ...............मधुरं गायति।।

**प्रश्नः 2** **क्रोधो हि शत्रुः प्रथमो नराणां देहस्थितो देहविनाशनाय।**

**यथास्थितः काष्ठगतो हि वह्निः स एव वह्निर्दहते शरीरम् ॥**

| सुधियः, मृगैः, मित्रता, तुरगाः |
|---|

भावार्थः - मृगाः ............... सह, गावश्च गोभिः, ............... तुरङ्गैः, मूर्खाः च मूर्खैः सह, ............... सुधीभिः सह मैत्रीं स्थापयन्ति । समानशीलव्यसनेषु ............... भवति।

**प्रश्नः 3** **यो न रक्षति वित्रस्तान् पीड्यमानान् परै सदा।**

**जन्तून् पर्थिवरूपेण स कृतान्तो न संशयः ॥**

| भयाकुलान्, रक्षति, राजा, यमराजः |
|---|

भावार्थः - यः ................ शत्रुभिः पीडितान् ................ जनान् न ................, सः जनानां कृते ................ भवति।

**प्रश्नः 4** **प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।**

**नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥**

| प्रियं, हितकरं, जनानां, नृपस्य |
|---|

भावार्थः - ................ सुखे एव नृपस्य सुखं अस्ति। जनानां हिते एव ................ हितम्। आत्मनः प्रियं नृपस्य ................ नास्ति। जनानां ................ एव नृपस्य हितकरम्॥

**प्रश्नः 5** **आचारः प्रथमो धर्मः इत्येतत् विदुषां वचः।**

**तस्मात् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥**

| प्राणेभ्यः, विद्वांसः, सदाचारः, प्रथमः |
|---|

भावार्थः - आचारः ................. धर्मः अस्ति, एवं वदन्ति ................. जनाः। अतः ................. अपि विशेषरूपेण ................. संरक्षणीयः।

**प्रश्नः 6** **वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।**

**सः केनापि प्रकारेण परैर्न परिभूयते ।।**

| धैर्यवान्, पराजितः, मन्त्री, भयरहितः |
|---|

भावार्थः - यः ................. भाषणे चतुरः, ................. सभायां ................. च अस्ति

सः अन्यैः ................. न भवति।

## अभ्यासप्रश्नानाम् उत्तरकुञ्चिका

**अन्वयः -**

| | | | | |
|---|---|---|---|---|
| प्रश्नः 1 | 1) उदीरतः | 2) नागाः | 3) अनुक्तम् | 4) रक्तः |
| प्रश्नः 2 | 1) स्वभावरौद्रम् | 2) अप्रियवादिनम् | 3) कृत्वा | 4) भविष्यति |
| प्रश्नः 3 | 1) परस्परविवादतः | 2) प्राणिनाम् | 3) तेषाम् | 4) जायते |
| प्रश्नः 4 | 1) पुत्राय | 2) यच्छति | 3) पिता | 4) तत्कृतज्ञता |
| प्रश्नः 5 | 1) विद्वांसः | 2) प्रकीर्तिताः | 3) वदने | 4) चक्षुनामनी |
| प्रश्नः 6 | 1) श्रेयः | 2) इच्छति | 3) कर्म | 4) कुर्यात् |

**भावार्थः -**

| | | | | |
|---|---|---|---|---|
| प्रश्नः 1 | 1) काकः | 2) कृष्णः | 3) वसन्तकाले | 4) कोकिलः |
| प्रश्नः 2 | 1) मृगैः | 2) तुरगाः | 3) सुधियः | 4) मित्रता |
| प्रश्नः 3 | 1) राजा | 2) भयाकुलान् | 3) रक्षति | 4) यमराजः |
| प्रश्नः 4 | 1) जनानाम् | 2) नृपस्य | 3) प्रियम् | 4) हितकरम् |
| प्रश्नः 5 | 1) प्रथमः | 2) विद्वांसः | 3) प्राणेभ्यः | 4) सदाचारः |
| प्रश्नः 6 | 1) मन्त्री | 2) धैर्यवान् | 3) भयरहितः | 4) पराजितः |

# घटनाक्रमानुसारम्

**1. अधोलिखित वाक्यानि घटनाक्रमानुसारेण पुनः लिखत :-**
क) स व्याघ्रः तथा कृत्वा काननं ययौ ।
ख) व्याघ्रः - शृगाल! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।
ग) एवं प्रकारेण बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।
घ) शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती।
ङ) अतएव उच्यते - बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा ।
च) जम्बूककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम् ?
छ) जम्बुकः - स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम्।
ज) जम्बुकः - यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्।
**2. अधोलिखित वाक्यानि घटनाक्रमानुसारेण पुनः लिखत :-**
क) यतो हि अयमन्येभ्यो दुर्बलः ।
ख) भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि ।
ग) अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत ।
घ) सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।
ङ) भद्रे ! नूनम् । सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?
च) पश्यतः एव सर्वत्र जलोपप्लवः सञ्जातः।
छ) कृषकः हर्षातिरेकेण कर्षणविमुखः सन् वृषभौ नीत्वा गृहमगात्।
ज) सः दीन इति जानन्नपि कृषकः बहुधा पीडयति ।
**3. अधोलिखित वाक्यानि घटनाक्रमानुसारेण पुनः लिखत :-**
क) स तामेव असान्त्वयत् - 'गच्छ वत्से! सर्वं भद्रं जायेत ।
ख) 'बहूनि अपत्यानि में सन्ति' इति सत्यम् ।
ग) सर्वेषु सन्तानेषु जननी तुल्यवत्सला एव।
घ) अचिरादेव चण्डवातेन मेघरवैः च सह प्रवर्षः समजायत ।
ङ) सुरभिवचनं श्रुत्वा इन्द्रस्य हृदयम् अद्रवत्।
च) यतोहि अयम् अन्येभ्यः दुर्बलः ।
छ) तथापि दुर्बले सुते मातुः अधिका कृपा भवति ।
ज) तथापि मम अस्मिन् पुत्रे विशिष्टः स्नेहः।

**4. अधोलिखित वाक्यानि घटनाक्रमानुसारेण पुनः लिखत :-**
क) सः पुत्रं द्रष्टुम् पदातिरेव प्राचलत् ।
ख) तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः ।
ग) कश्चन निर्धनः जनः वित्तम् उपार्जितवान् ।
घ) एकदा तस्य पुत्रः रुग्णः जातः ।
ङ) ग्रामवासिनः वराकमतिथिमेव चौरं मत्वा अभर्त्सयन् ।
च) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः ।

छ) रात्रिनिवासं कर्तुं कश्चिद् गृहस्थमुपागतः ।
ज) चौर: एव उच्चै: क्रोषितुमारभात ।

**5. अधोलिखित वाक्यानि घटनाक्रमानुसारेण पुनः लिखत :-**
क) अपरः वानरः सिंहस्य कर्णमाकर्षति ।
ख) वनस्य समीपे एका नदी वहति ।
ग) एकः वानरः तस्य पुच्छं धुनोति ।
घ) सः तं प्रहर्तुमिच्छति ।
ङ) एकः सिंहः सुखेन विश्रामं करोति ।
च) एवमेव वानराः वारं वारं सिंहं तुदन्ति ।
छ) सिंहः क्रुद्धः भवति ।
ज) वानराः कुर्दित्वा वृक्षमारोहति ।

# अर्थचयनम्

1.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत- (कवलं प्रनत्रयम्)
(i) भयङ्करा व्याघ्रमारी तूर्णं धाविता ।
(क) मन्दम् (ख) शीघ्रम्
(ग) वृथा (घ) पुरतः
(ii) सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।
(क) अतिन्यूनम् (ख) वृषभम्
(ग) बहु अधिकम् (घ) अनेकवारम्
(iii) किं कुपिता एवं भणति, उत प्रकृतिस्था?
(क) कथयति (ख) ताडयति
(ग) गर्जति (घ) हसति

(iv) एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम् ।
(क) ग्रामे (ख) नगरे
(ग) बने (घ) कृपकस्य गृहे

2.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत- (कवलं प्रनत्रयम्)
(i) पशुपति मस्तके चन्द्रः शोभते ।
(क) शिवः (ख) इन्द्रः
(ग) कृष्णः (घ) ब्रह्मा
(ii) व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।
(क) खादितः (ख) दत्तः
(ग) कृतः (घ) पलायितः

(iii) वयस्य अपूर्वं खलु नामधेयम् ।

(क) मित्र (ख) पथिक

(ग) वृद्धः (घ) भ्राता

(iv) मा ब्रूहि दीनं वचः?

(क) कथयति (ख) वद

(ग) गर्जति (घ) हसति

(v) एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि ।

(क) धनम् (ख) धमनम्

(ग) मार्गे (घ) धराम्

3.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत- (कवलं प्रनत्रयम्)

(I) अत्र निर्मलम् जलम् नास्ति ।

क) स्वच्छम् ख) मलम् ग) समलम्

(II) एकांते कांतारे संचरणम् स्यात् ।

क) गृहे (ख) वने ग) जले

(III) धरातलम् समलम् अस्ति ।

क) मलिनं ख) मल ग) भुविम्

(iv) अत्र संचरणम् कठिनम् अस्ति ।

क) दुष्करम् ख) चलनम् ग) गमनम्

4.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत- (कवलं प्रनत्रयम्)

(i) मम पिच्छानाम् अपूर्वं सौन्दर्यम् वर्तते।

(क) परिमितम् (ख) अपरिमितम्

(ग) विचित्रम् (घ) सामान्यम्

(ii) एकान्ते कान्तारे क्षणमपि सञ्चरणं स्यात् ।

(क) नगरे (ख) ग्रामे

(ग) कानने (घ) गृहे

(iii) यः इच्छति आत्मनः श्रेयः ।

(क) कल्याणम् (ख) धनम्

(ग) गृहम् (घ) विद्याम्

(iv) अहं यदि तव सन्ततिं न पालयामि ।

(क) परम्पराम् (ख) सन्तानम्

(ग) धनम् (घ) गृहम्

5.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत- (कवलं प्रनत्रयम्)

(i) निर्धनः जनः वित्तम् उपार्जितवान् ।

(क) धान्यम् (ख) धनम्

(ग) मन्त्रिणम् (घ) सैनिकः

(ii) अनृतं वदसि चेत् काकः दशेत् ।

(क) सत्यम् (ख) मिथ्या

(ग) पवित्रम् (घ) नृपम्

(iii) यः इच्छति आत्मनः श्रेयः ।

(क) फलम् (ख) कल्याणम्

(ग) धनम् (घ) पुण्यः

(iv) वृक्षोपरि विविधाः पक्षिणः हसन्ति।

(क) जीवाः (ख) पशवः

(ग) खगाः (घ) फलानि

---

केन्द्रीय विद्यालय संगठन, पटना सम्भाग (पटना)

कक्षा : दशमी

समय - त्रय होरा: विषय - संस्कृतम् पूर्णांक - **80**

---

सामान्यनिर्देशाः –

1. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **18** प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रशनपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

प्रश्नपत्रस्वरूपम् –

| | | |
|---|---|---|
| 'क' खण्डः | : अपठितावबोधनम् - | **10** अङ्काः |
| 'ख' खण्डः | : रचनात्मककार्यम् - | **15** अङ्काः |
| 'ग' खण्डः | : अनुप्रयुक्तव्याकरणम्- | **25** अङ्काः |
| 'घ' खण्डः | : पठितावबोधनम् - | **30** अङ्काः |

---

<u>खण्ड: क: - अपठित अवबोधनम् -</u> **10**

**1.** अधोलिखित गद्यांश पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

स्वस्थं पर्यावरणं अस्माकं जीवनस्य आधारः अस्ति। पर्यावरणस्य च आधाराः पुष्पिता: पल्लविताः वृक्षाः भवन्ति। प्रत्येक प्राणीश्वसनक्रियायां आक्सीजनवायुं गृह्णाति। कार्बन-डाइऑक्साइड वायुं बहिः विसृजति। वृक्षाणाम् श्वसनक्रिया तु मानवानां विपरीता अस्ति।अतः अनया पर्यावरणं स्वस्थं भवति। वृक्षाः पर्यावरणं संतुलितं कुर्वन्ति। ते यथाकालम् मेघानाम् वर्षणे सहायकाः भवन्ति। वृक्षाः भूमेः जलं गृह्णन्ति। अस्य जलस्य किञ्चित् भागं ते उपभुञ्जन्ति। अवशिष्टं जलं वाष्परूपेण पत्राणां रन्ध्रेभ्यः बहिः निर्गच्छति। इदं जलं मेघानाम् निमार्णे सहायकं भवति। भूमौ पतितानि तेषां पत्राणि पुष्पाणि च अतिरिक्तं जलं मृदं च व्यर्थं वहनात् अवरुन्धन्ति। इत्थम् ते भूमये पर्याप्यं जलं प्रदाय तस्याः उर्वराशक्तिं वर्धयन्ति। वृक्षाः पुष्पाणाम् फलानाम् औषधीनाम् च आगाराः सन्ति। वृक्षपादपानाम् हरीतिमा तेषां पुष्पाणाम् शोभा, पक्षिणाम् कलरवः च शुष्कहृदयान् अपि रसविभोरान् कुर्वन्ति।

**I)** एकपदेन उत्तरत – **(1x2=2)**

**(i)** पुष्पिता: वृक्षाः कस्य आधाराः?

**(ii)** अवशिष्टं जलं कस्मिन् रूपे बहिः निर्गच्छति ?

**II)** पूर्णवाक्येन उत्तरत - **(2x2=4)**

**(I)** भूमौ पतितानि पत्राणि पुष्पाणि च किम् कुर्वन्ति ?

**(ii)** मनुष्यः किम् गृह्णति किम् च विसृजति?

III) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। (1×1=1)

IV) यथानिर्देशं उत्तरत- (1×3=3)

(i) 'स्वस्थ' इति विशेषणपदस्य विशेष्यपद अत्र किम् प्रयुक्तम् ?

(क) जलम् (ख) वृक्षाः (ग) पर्यावरणम्

(ii) 'दानवानां' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(क) मानवानां (ख) पादपानां (ग) मेघानां

(iii) गृह्णन्ति इति क्रियापदस्य कर्तृपदं किम् ?

(क) पत्राणि ख) वृक्षाः (ग) मेघाः

खण्ड: ख: रचनात्मकं कार्यम् - 15

2. मित्रं प्रति अधोलिखितम् पत्रं मञ्जूषा -प्रदत्तशब्दैः पूरीयत्वा पुनः लिखत।

सरस्वती -छात्रावासः ।
तिथिः ...............
प्रियं मित्र। (i)................
सस्नेहं नमः।
अत्र कुशलं तत्रास्तु गतसप्ताहे अस्माकं (ii)................ संस्कृतसम्भाषण -शिबिरम् (iii).................. आसीत्।
चतुर्दशदिनानि यावत् वयं संस्कृत – संभाषणस्य (iv).................... अकुर्म । तत्र एकस्याः लघुनाटिकायाः (v).................... अपि अभवत्। अहं तु विदूषकस्य (vi)................ कृतवान्। सर्वे जनाः हसित्वा हसित्वा (vii)................ अकुर्वन्। अहम् इदानी सर्वदा संस्कृतेन एव (viii).......................। भवान् अपि संस्कृतेन संभाषणस्य अभ्यासं (ix) .............। पितरौ (x).....................मम प्रणामाञ्जलिं निवेदयतु।
भवतः मित्रम् ,
रवीन्द्रः।

मञ्जूषा –
अभिनयम् ,अभ्यासम् ,प्रति ,विद्यालये ,मञ्चनम् ,आयोजितम् ,करतलध्वनिम् ,वदामि ,
रमेश ! , करोतु
3. अधोलिखितं चित्रं वर्णयन् संस्कृतने पञ्चवाक्यानि लिखत –



मञ्जूषा – उद्यानम्, बालः, खेलतः, द्वौ, बाला करोति, पश्यति, वृक्षः, चित्रम्, रचयति, उपविशति, दोलायाम्, पादकन्दुकम्

अथवा

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखित विषयं अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकं अनुच्छेदं लिखत-

वर्षाकालः

मञ्जूषा-

(वर्षाकालः, अस्ति, बालकाः, बालिकाः च, क्रीडन्ति, कृष्णमेघाः, आकाशः, वृक्षाः सन्ति, दोलायां, दूरे, गृहाणि, पत्राणि, शाखाः, आनन्दम्, अनुभवन्ति, जलबिन्दवः पतन्ति, उल्लासस्य, वातावरणं दृश्यते)

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषायां लिखत- **1×5=5**

i) हमारे विद्यालय में वार्षिकोत्सव है।

ii) तुम अपना गृह कार्य कब करोगे?

iii) गंगा का जल पवित्र होता है।

iv) वे सब लड़कियाँ संस्कृत बोलती हैं |

v) सूर्य पूर्व दिशा में उदित होता है |

## खण्ड: ग: अनुप्रयुक्त व्याकरणं - 25

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिपदं सन्धिच्छेद पदम् वा कुरुत। **1×4=4**

(i) जगत् + नाथः चतुर्भुजो अस्ति |

(ii) अधुना वागीशः विद्यालये अस्ति |

(iii) जगदीश्वरः बालकान् रक्षति |

(iv) अस्मन् वने तु मृगाः + चरन्ति |

**6.** समासपदं वा विग्रहवाक्यं वा चिनुत। **1 x 4 = 4**

i) रामकृष्णौ देवौ स्तः।

अ. रामः कृष्णौ च आ.रामः च कृष्णः च

ii) दैवगतिः विचित्रा भवति।

अ. दैवाय गतिः आ. देवानां गतिः

iii. लम्बः उदरः यस्य सः श्रीगणेशः अस्ति।

अ. लम्बोदरः आ.लम्बादरः

iv) सः नेत्रयोः समीपम् धारयति।

अ. उपनेत्रम् आ. नेत्रसमीपम्

**7.** अधोलिखितां पदानां प्रकृति प्रत्ययं लिखत – 1×4=4

(i) मनुष्य जीवने परिश्रमस्थः महत्त्वं भवति |

(क) महतवं + त्वं (ख) महत् + त्वं (ग) महता + त्व (घ) महा + त्वम्

(ii) गुण + मतुप् सर्वत्र पूज्यते |

(क) गुणाः (ख)गुणवान् (ग) गुनमतुप (घ) गुणस्य

(iii) बालिकया माता चतुर + टाप् अस्ति |

(क) चतुरतमा (ख) चतुरा (ग) चतुरतरा (घ) चतुरी

(iv) वीर + त्व पुरुषस्य भूषणम् |

(क) वीरम् (ख) विरता (ग) वीराः (घ) वीरत्व

**8.** अधोलिखितानां वाक्यानां वाच्य परिवर्तनं कृत्वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।**1x3=3**

(i) धावकाः धावन्ति।

(क) धावकैः धाव्यते (ख) धावकः धाव्यते

(ग) धावके धाव्यते (घ) धावका: धावत्ये

(ii) सेवकः नृपम् रक्षति।

(क) सेवकः नृपः रक्ष्यते (ख) सेवकः नृपं रक्ष्यते

(ग) सेवकेन नृपः रक्ष्यते (घ) सेवकैः नृपः रक्ष्यते

(iii) तेन दुर्वचनं कथ्यते।

(क) सा दुर्वचन कथयसि (ख) तौ दुर्वचन कथयतः

(ग) सः दुर्वचनं कथयति (घ) तथा कथ्यते

**9.** अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत- **(4)**

**(i)** बालकः नित्यं _________**(5:00)** वादने भ्रमणं करोति |

**(ii)** राधा ___________ **(9:30)** वादने प्रातराशं करोति।

**(iii)** महेश: ___________ **(4:45)** वादने क्रीडति।

**(iv)** सर्वे ___________ **(10:15)** वादने शयनं कुर्वन्ति।

**10.** उचित अव्ययपदैः मञ्जूषातः रिक्तस्थानानि पूरयत - 1×3=3

**(i)** .......................... विदधीत न क्रियाम् |

**(ii)** मधुरा दिव्या वाणी ......................... गीर्वाण कथ्यते |

**(iii)** छात्राः सम्प्रति............................... कथं भ्रमन्ति ?

मञ्जूषा -

| | | |
|---|---|---|
| नूनम् | इतस्ततः | सहसा |

**11.** विकल्पेभ्यः शुध्दम् उत्तरं
चित्त्वा रिक्तस्थानानि सम्पूरयत – 1×3=3

**(i)** वृक्षे <u>चत्वारि</u> खगाः सन्ति |

(क) चतुरः (ख) चत्वारि (ग) चत्वारः (घ) चतस्रः

**(ii)** <u>वृक्षः</u> परोपकाराय फलन्ति |

(क)वृक्षान् (ख) वृक्षम् (ग) वृक्षौ (घ) वृक्षाः

**(iii)** अहं शास्त्रं <u>पठामः</u> |

(क) पठसि (ख) पठामि (ग) पठावः (घ) पठामः

## खण्ड: – 'घ' पठित-अवबोधनम्

**(अंक : 30)**

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - **5**

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् सः शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि "त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः अतः निजकृतत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति। न्यायाधीश: आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

**(I)** एकपदेन उत्तरत। **( ½ × 2 = 1)**

**(i)** न्यायाधीशेन पुनः तौ कस्याः विषये वक्तुमादिष्टौ?
**(ii)** निजपक्षं कः प्रस्तुतवति?

**(II)** पूर्णवाक्येन उत्तरत। **(1 × 2 = 2)**

**(i)** तत्र किम् आश्चर्यम् अघटत्?
**(ii)** न्यायाधीशः किम् निर्णयम् श्रुतवान् ?

**(III)** निर्देशानुसारम् उत्तरत। **(1 × 2 = 2)**

**(i)** 'भोगं कुरु' इत्यर्थे अत्र किं पर्यायपदं प्रयुक्तम्?
**(ii)** न्यायाधीशः तं जनं ससम्मानं मुक्तवान् इत्यत्र किं कर्तृपदम् अस्ति?

**13.** अधोलिखित पद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- **5**

सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥

**(I)** एकपदेन उत्तरत - **( ½ × 2 = 1)**
**(i)** कीदृश: वृक्षः सेवितव्यः ?
**(ii)** महावृक्षः कीदृशः भवति?
**(II)** पूर्णवाक्येन उत्तरत - **(1 × 2 = 2)**
**(i)** महावृक्षेषु दैवात् फलं नास्ति तथापि किं न निवार्यते ?
**(ii)** फलच्छायासमन्वितः कः सेवितव्यः ?
**(III)** भाषिककार्यम् - **(1 × 2 = 2)**
**(i)** 'महान् वृक्षः' अत्र विशेष्यपदं किम् ?
**(ii)** 'लघुवृक्षः' इति पदस्य विपर्ययपदं किं प्रयुक्तम्?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत **(05)**

काकः – आम् सत्यं कथितं त्वया-वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।
पिकः – (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र-तत्र का-का इति कर्कश ध्वनिना वातावरणमाकुलीकरोषि। न

रूपं न ध्वनिरस्ति। कृष्णवर्ण, मेध्यामध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?
काकः – अरे! अरे! कि जल्पसि? यदि अहं कृष्णवर्णः तर्हिं त्वं किं गौरागः? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा-'अनृतं वदसि चेत् काकः दशेत्'- इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते॥
पिकः – अलम् अलम् अतिविकत्थनेन कि विस्मर्यते यत्। काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः। वसन्तसमये प्राप्ते काकः काकः पिक: पिकः॥

(अ) एकपदेन उत्तरत (½ × 2 = 1)

(i) वस्तुत: वनराजः भवितुं तु अहममेव योग्य: इति क: कथितः?
(ii) कस्य न रूपं न ध्वनिम् अस्ति?

(आ) पूर्णवाक्येन उत्तरत। (1 × 2 = 2)

(i) काकस्य सत्यप्रियता जनानां कृते उदाहरण स्वरूपम् किम् अस्ति?
(ii) काकः स्वविषये किं कथयति?

(इ) निर्देशानुसारम् उत्तरत। (1 × 2 = 2)

(i) "अरे! अरे! किं जल्पसि" इत्यत्र किं क्रियापदं प्रयुक्तम्?
(ii) 'श्वेतः इत्यस्य किं विलोमपदं प्रयुक्तम्?

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (1 × 4 = 4)
(ii) पुरा त्वया मह्यम् व्याघ्रत्रयं दत्तम्।
(ii) महानगरेषु वाहनानाम् अनन्ताः पङ्कत्यः भवन्ति।
(iii) लव: कुश: च भ्रातरौ आस्ताम्।
(iii) जीर्ण: कूप: ग्रामे आसीत्।

16. मञ्जूषायाः सहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत। 1×4=4

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।
अन्योऽपि बुद्धिमौल्लोके मुच्यते महतो भयात् ॥

भावार्थ:- यथा सा रूपवती (स्त्री) निज (i)........ प्रयोगे व्याघ्रस्य (ii)......... विमुक्ता तथा अस्मिन् संसारे या(iii)............ भवति। अर्थात् यः बुद्धः (iv)............करोति सः अपि महतो भयात् मुच्यते मुक्त भवति।

मञ्जूषा - बुद्धिमान्, भयात्, उपयोगं, बुद्धेः

17. अधोलिखितवाक्यानि घटनाक्रमानुसारं लिखत- ½ x 8 = 4

(i) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

(ii) प्रत्युत्पन्नमतिः सा शृगालं आक्षिपन्ती उवाच।

(iii) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

(iv) मोर्गे सा एकं व्याघ्रम् अपश्यत्।

(v) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच - अधुना एकमेव व्याघ्रं विभज्य भुज्यताम् |

(vi) बुद्धिमती पुत्रद्वयेन उपेता पितृगृहं प्रति चलिता ।

(vii) 'त्वं व्याघ्रत्रयम् आनेतुं' प्रतिज्ञाय एकमेव आनीतवान् ।

(viii) गलबद्ध शृगालकः व्याघ्रः पुनः पलायितः

**18.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत **1x3=3**

**(i)** अत्र जीवनं <u>दुर्वहं</u> जातम्।

सरलम्/कठिनम्/जटिलम्

**(ii)** <u>तौयैः</u> अल्पैः अपि तरोः पुष्टिः भवति।

जलैः/त्वग्भि/दुग्धैः।

**(iii)**<u>अवक्रता</u> यथा चित्रे भवेत्।

सरलता/कठोरता/मृदुता

केन्द्रीय विद्यालय संगठन, पटना सम्भाग (पटना)

कक्षा : दशमी

समय - त्रय होराः                विषय - संस्कृतम्                पूर्णांक - 80

---

सामान्यनिर्देशाः –

1. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रशनपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

प्रश्नपत्रस्वरूपम् –

| | | |
|---|---|---|
| 'क' खण्डः | : अपठितावबोधनम् - | 10 अङ्काः |
| 'ख' खण्डः | : रचनात्मककार्यम् - | 15 अङ्काः |
| 'ग' खण्डः | : अनुप्रयुक्तव्याकरणम्- | 25 अङ्काः |
| 'घ' खण्डः | : पठितावबोधनम् - | 30 अङ्काः |

---

<u>खण्ड - क अपठित गद्यांश - 10 अङ्काः</u>

**1.** अधोलिखितं गद्यान्शं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

वर्तमानयुगं संगणकयुगम् अस्ति | अधुना प्रत्येकक्षेत्रे सङ्गणकस्य प्रयोगः भवति | अद्य नवीनैः वैज्ञानिकैः आविष्कृतेषु साधनेषु संगणकयन्त्रं महत्वपूर्णं उपयोगी च अस्ति | जनानां मष्तिष्के ये विचाराः स्मृतिरूपेण स्थाप्यन्ते ते एकस्मिन्नेव संगणकयन्त्रे दत्तान्श रूपेण(**DATA**) क्रूडीकर्तुं (**CODING**) शक्यन्ते | अतः संप्रति काले संगणकयन्त्रस्य गरिमा दिने-दिने वर्धमाना अस्ति | संगणकयन्त्रे अत्यन्तं प्रमुखाः बहूपयोगिनः च विषयाः संगृहीताः सन्ति | यदि कृमिप्रवेशेन (**VIRUS**) संगणकयन्त्रं दोषपूर्णं भवति चेत् दत्तान्शाः पुनः न लभन्ते | इमं दोषं निवारयितुं नूतनं तन्त्रज्ञानं अधुना (**SAFETY TECHNOLOGY**) इति संस्थया अभिवर्धितम् | संगणकयन्त्रं विनष्टं चेदपि अन्तर्जालद्वारा (**INTERNET**) अस्मिन्विश्वे यत्र कुत्रापि ते अन्शाः पुनर्ग्रहीतुं शक्यन्ते |

**I.**एकपदेन उत्तरत –                **1x2=2**

**(i)** कस्य गरिमा दिने-दिने वर्धमाना अस्ति ?

**(ii)** संगणकयन्त्रं अद्यकैः वैज्ञानिकैः आविष्कृतम् ?

**II.पूर्णवाक्येन उत्तरत –** **2x2=4**

**(i) केन संगणकयन्त्रदोषपूर्णं भवति ?**

**(ii) जनानां मष्तिष्के विचाराः केन रूपेण स्थाप्यते ?**

**III.अस्य अनुच्छेदस्य कृते उपयुक्त शीर्षकं लिखत -** **1x1=1**

**IV.यथानिर्देशम्उत्तरत –** **1x3=3**

**(i) <u>अस्ति</u> क्रियायाःकर्तृपदंकिम् ?**

(क) विचारः (ख) संगणकयन्त्रम् (ग) विषयः

**(ii) (नूतनंतन्त्रजालं) अनयोः पदयोः विशेषणं किमस्ति ?**

(क) नूतनम् (ख) प्राचीनं (ग) तन्त्रज्ञानम्

**(iii)अनुच्छेदे (पुरातनम्) पदस्यकः विपर्ययः आगतः ?**

(क) रत्नम् (ख)नूतनं (ग) विनष्टम्

**<u>खण्ड - ख रचनात्मक-कार्यम् (15 अङ्का:)</u>**

**2. अग्रजं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषापदसहायतया पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु-**
**½ x10= 5**

**मञ्जूषा-**

**(लेखिष्यति, दिल्ली, कुशली, सम्यक्, प्रियअग्रज !, आगमिष्यति कुशलं, अनुजः, स्मरतः, अवश्यम्)**

**(1)...............**

**दिनाकः-....................**

**(2).....................प्रणामाः**

**अहमत्र (3) ...................,भवान् अपि तत्र कुशली अस्ति इति मन्ये | मातापितरौ तु सर्वदा त्वां(4).............| तवाग्रजा आगामिमासे रक्षाबन्धनपर्वणि गृहं (5).....................| भवान् अपि (6)........... आगच्छतु | अस्मिन् विषये तवाग्रजा अपि त्वां पत्रं (7).............| भवन्तः अध्ययनं (8)............... चलति इति वयम् चिन्तयामः | अन्यत्सर्वं (9)........... | सर्वेभ्यः मित्रेभ्यः मदीयाः शुभकामनाः |**

**भवतः (10)......................**

कुलदीपः

3. चित्रं दृष्ट्वा मञ्जूषा-प्रदत्त-शब्द-सहायतया पञ्च वाक्यानि लिखत - 1x5=5




मञ्जूषा-

(उद्याने, बालकाः, बालिकाः, भ्रमन्ति, इतस्ततः, स्त्रियः, दोलाः, बालकेन, शिशवः, सह, वृक्षाः, क्रीडन्ति, परस्परं, बहवः)

अथवा

मञ्जूषाप्रदत्त-पदानां सहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत |

मञ्जूषा- (विद्या, आवश्यकता, ज्ञानम्, बुद्धिं, विद्यायाः, पशुः, विकासयति, धनं, लोके, विद्याविहीनः, नाम, मानवस्य )

4. अधोलिखितानि वाक्यानि संस्कृतभाषायां लिखत - 1x5=5

(i) बालक उपवन जाता है |

(ii) श्यामा पाठ पढ़ती है

(iii) उज्ज्वल कहाँ जाता है ?

(iv) कमला कहाँ गई थी ?

(v) ऋतुराज कल प्रयाग जाएगा ?

## खण्ड - ग अनुप्रयुक्त-व्याकरणम् (25 अङ्का:)

5. सन्धिं सन्धिविच्छेदं वा कुरुत- 1×4=4

(i)चलदनिशं कालायसचक्रम्।

(ii) व्याघ्रोऽपि सहसा नष्ट: गलबद्धश्रृगालक:।

(iii) मूर्खाश्च मूर्खै: सुधिय: सुधिभि:।

(iv) निसर्गे स्यान्न समाविष्टा।

6. समासं विग्रहं वा चिनुत- 1×4=4

(i)समलं धरातलं।

क) मलस्य सहितम् ख) मलं सहितम् ग) मलेन सहितम्

(ii) तत्र राजसिंह: नाम राजपुत्र: वसति स्म।

क) राजस्य पुत्र: ख) राज्ञ: पुत्र: ग) राज पुत्र:

(iii) को भेद: पिककाकयो: ।

क)पिक: च काक: च ख) पिक: च काक: ग) पिक: काक: च

(iv) कार्यं निर्विघ्नं सम्पन्नं।

क) विघ्न: अभाव: ख) विघ्नानाम् अभाव: ग) विघ्नेन अभाव:

7. प्रकृति- प्रत्ययौ संयोज्य विभज्य वा उचितं उत्तरम् चिनुत- 1×4=4

(i) हरिततरूणां ललितलतानां माला रमणीया।

क) रमणीया+ आ ख) रमणीय+ टाप् ग) रमणीय+आ

(ii) अन्योऽपि बुद्धिमान् लोके।

क)बुद्धि+ मान् ख) बुद्धि+ मत् ग) बुद्धि+ मतुप्

(iii) तदेवाहु महात्मान: समत्वम् इति तथ्यत:।

क)सम+त्व ख) सम+ त्वम् ग) सम+ त्रय

(iv) यत्रास्ते सा धूर्त+ टाप् तत्र गम्यताम्।

क)धूर्ता  ख) धूर्त  ग) धूर्ता:

8. वाच्यस्य नियमानुसारम् उचितं विकल्पं चिनुत- 1×3=3

(i) अहमपि त्वया सह ___________।

क) चलति  ख) चलानि  ग) चलामि

(ii) मया तु अधुना संस्कृतस्य अभ्यास: ____________।

क)करोमि  ख) क्रियते  ग) क्रियन्ते

(iii) त्वया पुष्पाणि ___________।

क) चीयन्ते  ख) चीयते  ग) चिनोति

9. संस्कृते समयं लिखत- 1×4=4

i) सा (5:30) -------------- भ्रमणाय गच्छति।

ii) राजेश: (3:40) ----------------गृहकार्यं करोति।

iii) स: (7:00 ) -------------- देवालयात् आगच्छति।

iv) सीता (6:45) ---------- विद्यालयम् गच्छति।

10. उचित अव्यय पदं चिनुत | 1×3=3

I) वने सिंह: -------------- गर्जति।

ii) प्राय: वृद्धा: ------------ भ्रमन्ति।

iii) संस्कृतं ------------ भारतस्य प्रतिष्ठा नास्ति।

11. अधोलिखितवाक्येषु रेखाङ्कितपदं अशुद्धं अस्ति, शुद्धं पदं विकल्पेभ्य: 1×3=3

I) ता: बालिकाः समाचारपत्रं पठति ।

क) पठसि  ख) पठन्ति  ग) पठथ

ii) इमे वस्त्राणि मलिनानि सन्ति।

क)इदम्  ख) अयम्  ग) इमानि

iii) स: चौरेण बिभेति।

क)चौर:  ख) चौरात्  ग) चौरस्य

## खण्डः 'घ'- पठितावबोधनम् (30 अङ्काः)

12. अधोलिखित गद्याशं, पद्याशं नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

अ. विचित्रता दैवगति:। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौर: गृहाभ्यन्तरं प्रविष्ट:। तत्र निहितामेकां मञ्जूषां आदाय पलायित: ।चौरस्य पादध्वनिना प्रबुद्धो: अतिथि: चौरशङ्कया तमन्वधावत् अगृहणात् च,परं विचित्रं अघटत्। चौर: एवं उच्चै: क्रोशितुमारभत् " चौरोऽयम् चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धा: ग्रामवासिनी: स्वगृहात् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर: आसीत्।

I. एकपदेन उत्तरत- ( केवलं प्रश्नद्वयं) ½×2=1

i) गृहाभ्यन्तर: क: प्रविष्ट:?

ii)अतिथि केन प्रबुद्ध:?

II. पूर्णवाक्येन उत्तरत- 1×2=2

i) ग्रामवासिन: किम् अकुर्वन् ?

ii) वस्तुत: चौर: क: आसीत् ?

III. भाषिककार्यम् 1×2=2

i) "चौर: किम् आदाय पलायित" अत्र कर्तृ पदं किम् ?

ii) "आरक्षी एव चौर: आसीत्" अत्र क्रिया पदं किम् ?

13. अधोलिखित पद्याशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानं।

वाष्पयानमाला संधावति वितरन्ती ध्वानम्।।

यानानां पङ्कतयो ह्यनन्ता: कठिनं संसरणम्।।शुचि--- ।

I.एकपदेन उत्तरत-(केवलं प्रश्नद्वयं) ½×2=1

i) किम् कज्जलमलिनं धूमं मुञ्चति?

ii) वाष्पयानमाला किम् कुर्वन्ति संधावति?

II. पूर्णवाक्येन उत्तरत- 1×2=2

(i) संसरणम् कठिनं कथं भवति?

(ii) ध्वानं वितरन्ती का संधावति?

इ. भाषिककार्यम् – 1×2 = 2

i "शतशकटीयानम्" अत्र विशेषणपदं किम् ?

ii 'चलनं' इति क्रियापदस्य पर्यायपदं किम्?

**14.** अधोलिखित नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत- **3**

काकः - आम् सत्यं कथितं त्वया - वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

पिकः - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रुपं न ध्वनिरस्ति। कृष्णवर्णं, मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम्?

काकः - अरे! अरे! किं जल्पसि ?यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा - 'अनृतं वदसि चेत् काकः दशेत्' इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् अपि च काकचेष्टःविद्यार्थी एव आदर्शच्छात्रः मन्यते।

पिकः - अलम् अलम् अतिविकत्थनेन। किं विस्मर्यते यत् -

अ) एकपदेन उत्तरत – **½×2=1**

I) अनृतं वदसि चेत् कः दशेत्?

II) कः वातावरणम् आकुलीकरोति?

आ) पूर्णवाक्येन उत्तरत – **1×2=2**

I) काकानां सत्यप्रियता केषां कृते उदाहरणस्वरूपा? ?

II) पिकस्य वर्णः कीदृशं भवति?

इ भाषिकाकार्यम् - **1 x 2 =2**

i) काकचेष्टः विद्यार्थी किम् मन्यते अत्र क्रियापदं किम् ?

ii) "प्रसिद्दम्" इति पदस्य स्थाने किं पदं प्रयुक्तम् ? \

**15.** रेखाङ्कितपदानि आधृत्य प्रश्न-निर्माणं कुरुत- **1×4=4**

I) <u>प्रस्तरतले</u> लतातरुगुल्मा पिष्टाः न भवन्तु।

ii) व्याघ्रः <u>श्रृगालेन</u> सहितं पुनः आगच्छत्।

iii) दुर्बले सुते <u>मातुः</u> अभ्यधिका कृपा भवति।

iv) <u>अस्तसमये</u> सविता रक्तः भवति।

**16.** अधोलिखितश्लोकानाम् अन्वयं मञ्जूषातः उचितं पदं चित्वा पूरयत- **1×4 =4**

यदि पुत्रसहस्त्रं मे, सर्वत्र सममेव मे।

दीनस्य तु सतः शक्र ! पुत्रस्याभ्यधिका कृपा ।।

अन्वयः - शक्र! यदि मे (i) ........... मे सर्वत्र (ii) .......... तु दीनस्य (iii)........... सतः (iv)............ कृपा |

मञ्जूषा

(सममेव, अभ्यधिका, पुत्रसहस्त्रम् ,पुत्रस्य)

अथवा

मञ्जूषाया:साहाय्येन श्लोकस्यभावार्थे रिक्तस्थानानि पूरयित्वा पुनः: लिखत-

यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म स परेभ्यः कदापि च।

भावार्थः- अस्य भावोऽस्ति यत् यदि जनः आत्मनः कृते (i) .......... बहूनि च सुखानि वाञ्छति तर्हि तेन परेभ्यः जनेभ्यः कदापि (ii) ............. कर्म न कर्तव्यम्। यतोहि एषा साधूक्तिः अस्ति यत् यः परेभ्यः (iii)........... खनति, तस्य कृते गर्तं स्वयमेव प्रकृत्या जन्यते। अतः अस्माभिः कदापि iv)----------कृते पीडनं न कर्तव्यम्।

मञ्जूषा :-

(कूपम्, परेषाम् ,कल्याणम्, अहितकरम्)

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत- **½×8=4**

i) बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।
ii) तस्य भार्या बुद्धिमती आसीत्।
iii) मार्गे सा एकं व्याघ्रं ददर्श।
iv) राजसिंहः नाम राजपुत्रः वसति स्म।
v) सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
vi) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।
vii) अस्ति देउलाख्यो नाम ग्रामः।
viii) सा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्या जगाद।

**18.** अधोलिखितपदेषु रेखाङ्कितपदानां प्रसंगानुकुलं उचितं अर्थं चिनुत- **1×3=3**

I) <u>विमूढधीः</u>अपक्वं फलं भुङ्क्ते।
क) पुरुषः ख) मूर्खः ग) सज्जनः

ii)एतेन आरक्षिणा <u>अध्वनि</u> यदुक्तं तद् वर्णयामि।
क)ध्वनिः ख) आदेशः ग) मार्गे

iii) <u>अनृतं</u> वदसि चेत् काकः दशेत्।
क) सत्यं ख) असत्यं ग) कर्कशः

**केन्द्रीय विद्यालय संगठन, पटना सम्भाग (पटना)**

**कक्षा : दशमी**

**समय - त्रय होराः          विषय - संस्कृतम्          पूर्णांक - 80**

---

**सामान्यनिर्देशाः –**

1. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रशनपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

**प्रश्नपत्रस्वरूपम् –**

| | | |
|---|---|---|
| ’क’ खण्डः | : अपठितावबोधनम् - | 10 अङ्काः |
| ’ख’ खण्डः | : रचनात्मककार्यम् - | 15 अङ्काः |
| ’ग’ खण्डः | : अनुप्रयुक्तव्याकरणम्- | 25 अङ्काः |
| ’घ’ खण्डः | : पठितावबोधनम् - | 30 अङ्काः |

---

**खण्ड - क अपठित गद्यांश - 10 अड्का:**

**1.** अधोलिखितं गद्यांशं पठित्वा एतधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत -

इदं हि विज्ञानप्रधानं युगम्। 'विशिष्टं ज्ञानं विज्ञानम्' इति कथ्यते। अस्यां शताब्द्यां सर्वत्र विज्ञानस्यैव प्रभावो दूरीदृश्यते। अधुना नहि तादृशं किमपि कार्यं यत्र विज्ञानस्य साहाय्यं नापेक्ष्यते। आवागमने, समाचारप्रेषणे, दूरदर्शने, सम्भाषणे, शिक्षणे, चिकित्साक्षेत्रे, मनोरंजनकार्ये, अन्नोत्पादने, वस्त्रनिर्माणे, कृषिकर्मणि तथैवान्यकार्यकलापेषु विज्ञानस्य प्रभावस्तदपेक्षा च सर्वत्रैवानुभूयते।

सम्प्रति मानवः प्रकृतिं वशीकृत्य तां स्वेच्छया कार्येषु नियुक्ते। तथाहि वैज्ञानिकैरनेके आविष्काराः विहिताः। मानवजातेः हिताहितम् अपश्यद्भिः वैज्ञानिकैः राजनीतिविज्ञैर्वा परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः। तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं निघृणं च। अयं च न विज्ञानस्य ' दोषः न वा परमाणुशक्तेरपराधः, पुरुषापराधः खलु एषः। अतोऽस्य मानवकल्याणार्थमेव प्रयोगः करणीयः।

(क) एकपदेन उत्तरत -          **1 x 2 = 2**

**(i)** विशिष्टं ज्ञानं किं कथ्यते ?

(ii) विज्ञानस्य प्रयोगः कुत्र करणीयः?

(ख) पूर्णवाक्येन उत्तरत - 2 x 2 = 4

(i) अधुना समस्तकार्यकलापेषु कस्य प्रभावः अनुभूयते ?

(ii) अद्य वैज्ञानिकैः परमाणुशक्तेः विशेषतः कुत्र उपयोगो विहितः?

(ग) उपर्युक्तगद्यांशस्य समुचितं शीर्षकं लिखत। 1

(घ) भाषिककार्यम् 1 x 3 = 3

(i) 'दूरीदृश्यते' इति क्रियापदस्य कर्तृपदं किमस्ति ?
(क) प्रभावः (ख) विज्ञानस्य (ग) साहाय्यम् (घ) सर्वत्र

(ii) 'विज्ञानप्रधानम्' इति विशेषणस्य गद्यांशे विशेष्यपदं किम् ?
(क) ज्ञानम् (ख) इदम् (ग) युगम् (घ) विशिष्टम्

(iii) 'हितम्' इत्यस्य गद्यांशे विलोमपदं किं प्रयुक्तम्?
(क) विहितम् (ख) दोषः (ग) अपराधः (घ) अहितम्

## खण्ड - ख रचनात्मक-कार्यम् (15 अङ्का:)

2. स्वमित्रं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखत। ½ ×10 = 5

रामकृष्णपुरम्
नवदिल्ली
दिनाङ्कः - 08.12.2012

प्रिय (i)______________

सप्रेम नमोनमः ।

(ii) ______________ कुशलं तत्रास्तु। परं हर्षस्य विषयोऽयं यत् (iii) _____________ भगिन्याः विवाहः सुनिश्चितो जातः। (iv) _____________ जयपुरतः आगमिष्यति। विवाहस्य कार्यक्रमः (v) _____________ मासे दशम्यां तारिकायां गृहं समया (vi) _____________ सम्पत्स्यते। अतः भवान् अस्मिन् (vii) _____________ सपरिवारम् अत्र आगत्य शोभां वर्धयतु। (viii) _____________ अनुवर्तते । मातृपितृचरणयोः मे(ix) _____________ ।

भवदीयं मित्रम्

(x)_____________

[मञ्जूषा - शान्तनुः, अग्रिमे, अत्र, सुहृदः, प्रणामाञ्जलिः, मम, उद्याने, शुभावसरे, कार्यक्रमः, वरयात्रा ]

**3 .** अधः प्रदत्तं चित्रम् दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। **1X5=5**




[मञ्जूषा – आत्मनिर्भर, प्रारम्भः, भारतस्य, प्रधानमन्त्री, महाभागः, कृतवान्, दृष्टिकोणम्, एकः, देशः, भवेत्, भवेयुः, संसाधन, उपयोगः, संसाधनानां, अस्ति, भारतम्, सम्पन्न । ]

अथवा

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत- **1x5=5**

विषयः-आदर्शछात्रः

मञ्जूषा- [पुस्तकानाम् आदरः, प्रातः समये, महत्त्वं गुरुम्, विलम्बेन, शतप्रतिशम्,

विद्यालयः, सम्मानम् ,व्यवहारकुशलः, आज्ञाकारी, सत्यवादी, पठने, क्रीडने]

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत- **1×5=5**

**(i)** श्याम पिता के साथ बाजार जाता है।

**(ii)** सीता राम के साथ वन गयी।

**(iii)** नदियों में गङ्गा पवित्र नदी है |

**(iv)** कल मेरे अध्यापक विद्यालय आयेगें।

(v) नदी के दोनों ओर उपवन है ।

## खण्ड - ग अनुप्रयुक्त-व्याकरणम् (25 अङ्का:)

5.अधोलिखित वाक्येषु रेखांकितपदानाम् संधि पदम्/संधि विच्छेदम् पदम् वा चिनुत। **1×4=4**

(i) राम: + च लक्ष्मणश्च वनम् गतौ ।

(क) रामश्च (ख) रामच (ग) रामास्च

(ii) वने नृप: + रक्षति ।

(क) नृपरक्षति (ख) नृपोरक्षति (ग) नृप: रक्षति

(iii) अत्र बालस्तिष्ठति।

(क) बाल: + तिष्ठति (ख) बालम् + तिष्ठति (ग) बालक + तिष्ठति

(iv) मूर्खेण पुत्रेण कोऽर्थ: ?

(क) कः + अर्थ: (ख) काः + अर्थ (ग) कम् + अर्थ:

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - **1X4=4**

i) कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं करोति स्म।

(क) क्षेत्रं कर्षणम् (ख) क्षेत्रात् कर्षणम् (ग) क्षेत्रस्य कर्षणम् (घ) क्षेत्रम् कर्षणम्

ii) यदि पुत्रसहस्रं मे |

(क) पुत्रस्य सहस्रम् (ख) पुत्रे सहस्रम् (ग) पुत्रेषु सहस्रम् (घ) पुत्राणाम् सहस्रम्

iii) विचित्र दैवगतिः |

(क) दैवनगतिः (ख) दैवेगतिः (ग) दैवायगतिः (घ) दैवस्य गतिः

iv) भ्राता च स्वसा च |

(क) भ्रातरौ (ख)भ्रातृ (ग) भ्रातरः (घ) भ्राता

7 .अधोलिखित वाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्य: चिनुत । **1×4=4**

(i) आगता पर्वसु प्रिया दीपावली: ।

(क) पृ + टाप् (ख) प्रिय + टाप्  (ग) प्रिया + टाप्

**(ii)** वयं <u>बुद्धि+मतुप्</u> जनं प्रणमामः।

(क) बुद्धिमान्   (ख) बुद्धिमन्तम   (ग) बुद्धिमती

**(iii)** सा <u>बालिका</u> मधुरस्वरेण गायति।

(क) बालक + टाप्   (ख) बालक + तल्   (ग) बालक + आ

**(iv)** सः पठनस्य <u>महत् + त्व</u> जानाति।

(क) महता   (ख) महतम्   (ग) महत्वम्

**8.**वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत **1x3=3**

**(i)** शिक्षकः- किं त्वं संस्कृतम्___________ **?**

(क) जानासि   (ख) ज्ञायते   (ग) जानाति   (घ) पठ्यते

**(ii)**छात्रः-आम्, मया______ ज्ञायते।

(क) संस्कृतः   (ख) संस्कृता   (ग) संस्कृतम्   (घ) संस्कृतेन

**(iii)**शिक्षकः- किं भवान् महाभारतम्___________**?**

(क) पठति   (ख) पठन्ति   (ग) पठतः   (घ) पठ्यते

**9.** कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत - **1×4=4**

**(i)** मम पितामहः रात्रौ **(10.00)....................** वादने स्वपितिः।

**(ii)** सः प्रातः **(5.00) ....................** वादने उत्तिष्ठति।

**(iii)** पितामहः प्रातः **(5.30).......................** वादने भ्रमाणाय उद्यानं गच्छति।

**(iv)** सः **(7.45) ........................** वादने ईशप्रार्थना करोति।

**10.** वाक्यानुगुणम् उचिताव्ययपदं चिनुत- **1×3 = 3**

**(i)** केशवः – शेखर! तव जन्मदिवसः .............. मान्यते**?**

(क).कदा   (ख) अद्य   (ग) सम्प्रति

**(ii)** शेखरः - केशवः! .............. एव मम जन्मोत्सवः भविष्यति। एवं मम गृहे असि।

(क).श्वः   (ख) ह्यः   (ग) अधुना

(iii) शेखरः - ................ त्वं आगमिष्यसि तदैव अहं 'केककर्तनम्' करिष्यामि।

(क) यदा (ख) तदा (ग) कदा

**11.** अधोलिखित वाक्येषु रेखांकितपदम् अशुद्धम् अस्ति । शुद्धम् पदम् विकल्पेभ्य: चिनुत ।
**1×3=3**

(i) स: बालिका क्रीडति ।

क ) बालक: ख ) बालिका: ग ) बालकं

(ii) अहं अध्ययनशील: असि ।

क ) अस्ति ख ) अस्मि ग ) असीत्

(iii) त्वं जलं पिबति ।

क ) पिबामि ख ) पिबेम ग ) पिबसि

## खण्डः 'घ'- पठितावबोधनम् (30 अङ्काः)

**12.**अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- **5**

बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्यपत्येषु जननी तुल्यवत्सला एव ।तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति ।सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। सः च तामेवमसान्त्वयत्-" गच्छ वत्से सर्वं भद्रं जायेत।"

अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। पश्यतः एवं सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षातिरेकेण कर्षणाविमुखः सन्

वृषभौ नीत्वा गृहमगात्।

अ. एकपदेन उत्तरत **½ ×2=1**

क) सर्वेष्वपत्येषु जननी कीदृशी भवति?

ख) कुत्र जलोपप्लवः सञ्जातः?

आ. पूर्णवाक्येन उत्तरत **1×2=2**

क) कस्य वचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।

ख)आखण्डलः सुरभिं कथम् असान्त्वयत्?

इ. निर्देशानुसारम् उत्तरत **1x2 = 2**

क.) 'जनकः' इति पदस्य विपर्ययपदं किम् ?

ख) 'शीघ्रम्' इति पदस्य पर्यायपदं किम् प्रयुक्रम्?

**13.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। **5**

"क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देहविनाशनाय ।

यथास्थितः काष्ठगतो हि वह्निः, सा एव वह्निर्दहते शरीरम् ।"

अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) **½ x 2=1**

क)नराणां प्रथमः शत्रुः कः ?

ख) क्रोधः कुत्र स्थितो भवति?

आ. पूर्णवाक्येन उत्तरत **1×2=2**

क) कीदृशो अग्निः शरीराणि दहति ?

ख) क्रोधः नराणां कोऽस्ति ?

इ. निर्देशानुसारम् उत्तरत **1×2=2**

क.) ' प्रथमः शत्रुः' अनयोः पदयोः विशेषणपदं किम्?

ख) 'दहते' इति क्रियापदस्य कर्तृपदं किम् ?

**14.**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत **5**

काकः- रे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः।

गजः- समीपतः एवागच्छन् अरे! अरे! सर्वां वार्तां शृण्वन्नेवाहम् अत्रागच्छम् ।अहं विशालकायः, बलशाली, पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः कोऽपि, वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी । अतः अहमेव योग्यः वनराजपदाय।

वानरः-अरे!अये!एवं वा(शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति।)

अ. एकपदेन उत्तरत **1/2×2=1**

क) काकः कस्य सन्ततिं पालयति ?

ख)करुणापरः पक्षिसम्राट् कः ?

आ.पूर्णवाक्येन उत्तरत 1×2=2

क) गजः आत्मनः विषये किं कथयति?

ख) वानरः किं कृत्वा वृक्षोपरि आरोहति?

इ. निर्देशानुसारम् उत्तरत 1x2=2

क.) 'सर्वां वार्ताम्' अत्र विशेष्यपदं किं प्रयुक्तम्?

ख.) 'अहमेव योग्य:' अत्र 'अहम्' पदं कस्मै प्रयुक्तम्?

**15.** रेखाङ्कित-पदानि अधृत्य प्रश्ननिर्माणं कुरुत **1×4=4**

**i)** फलच्छायासमन्वितः महान् वृक्षः सेवित्तव्यः।

**ii)** मूर्खाः मूर्खैः सह अनुव्रजन्ति ।

**iii)** सिंहः सर्वजन्तून् दृष्ट्वा पृच्छति।

**iv)** परस्परं विवादतं प्राणिनां हानिः जायते।

**16.** मञ्जूषायाः साहाय्येन श्लोकस्य अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत। **1 ×4=4**

त्यक्त्वा धर्मप्रदां वाचं परुषाम् योऽभ्युदीरयेत् ।

परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ।।

अन्वय : - यः ........(i)......... वाचं त्यक्त्वा ........... (ii) ............ (वाचम्) अभ्युदिरयेत्। (सः) विमूढधीः ...........(iii) ............फलं परित्यज्य ............ (iv) .............(फलं) भुङ्क्ते।

मञ्जूषा - परुषाम् , पक्वं , अपक्वं , धर्मप्रदां

अथवा

अधोलिखित श्लोकस्य भावार्थे मंजूषायाः उचितपदै : पूरयत ।

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।

अश्वश्चेद् धावने वीरः भारसस्य वहने खर : ।।

भावार्थः- निश्चयमेव अयं (i)......... विचित्रः वर्तते यत्र किञ्चित् अपि (ii)........ न अस्ति ।

यदि (iii)....... धावने श्रेष्ठः तर्हि गदर्भः भारवहने । यथासमयम् सर्वेषामेव (iv)......... विद्यते।

मञ्जूषा – महत्वम् , संसार : , निरर्थकम्, अश्वः

**17.** अधोलिखित कथांशम् समुचित क्रमेण लिखत ।　　　　　　**½ ×8=4**

**(i)** व्याघ्रमारी काचिदियमिति मत्वा व्याघ्र: पलायित: ।
**(ii)** भयंकरा व्याघ्रमारी पूर्णम् धाविता ।
**(iii)** शृगालेन सहितम् पुनरायान्तम् व्याघ्रम् दृष्ट्वा बुद्धिमती जम्बूकम् – आक्षिपति।
**(iv)** बुद्धिमती पुत्रद्वयोपेता पितुः-गृहम् प्रति चलिता ।
**(v)** बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ता – अभवत् ।
**(vi)** मार्गे सा एकं व्याघ्रमागच्छन्तं दृष्ट्वा पुत्रौ चपेटया प्रहृत्य जगाद् ।
**(vii)** गलबद्धशृगालक: व्याघ्रोऽपि सहसा नष्ट: ।
**(viii)** अयमेकस्तावद्विभज्य भुज्यताम् ।

**18.** अघोलिखित वाक्येषु रेखांकितपदानाम् कृते उचितम् अर्थं चित्वा लिखत-　　**1×3=3**

**(i)** दुर्बल: बलीवर्द: जवेन गन्तुम् अशक्तः आसीत् ।

(क) शीघ्रेन　　(ख) तीव्रगत्या　　(ग) सुखेन

**(ii)** अस्माकं ऐक्यं विश्वप्रथितम् ।

(क)मित्रं　　(ख) एकता　　(ग) लघु

**(iii)** सर्वं वृत्तम् अवगत्य सः तं निर्दोषम् अमन्यत।

(क) गत्वा　　(ख) आगत्य　　(ग) ज्ञात्वा

# (उत्तराणि)

केन्द्रीय विद्यालय संगठन, पटना सम्भाग (पटना)

कक्षा : दशमी

समय - त्रय होराः    विषय - संस्कृतम्    पूर्णांक - 80

---

प्रश्नपत्रस्वरूपम् –

| | | |
|---|---|---|
| 'क' खण्डः | : अपठितावबोधनम् - | 10 अङ्काः |
| 'ख' खण्डः | : रचनात्मककार्यम् - | 15 अङ्काः |
| 'ग' खण्डः | : अनुप्रयुक्तव्याकरणम्- | 25 अङ्काः |
| 'घ' खण्डः | : पठितावबोधनम् - | 30 अङ्काः |

---

<u>खण्ड - क अपठित गद्यांश - 10 अङ्काः</u>

**1. I.** एकपदेन उत्तरत –    **(1x2=2)**

(i) जीवनस्य
(ii) वाष्परूपेण

II.पूर्णवाक्येन उत्तरत –    **2x2=4**

(i) भूमौ पतितानि तेषां पत्राणि पुष्पाणि च अतिरिक्तं जलं मृदं च व्यर्थं वहनात् अवरुन्धन्ति
(ii) मनुष्य: आक्सीजनवायुं गृह्णाति कार्बन-डाइऑक्साइड वायुं बहिः विसृजति।

III. स्वस्थं पर्यावरणं

IV.यथानिर्देशम्उत्तरत –    **1x3=3**

(i) (ग) पर्यावरणम्
(ii) (क) मानवानां
(iii) ख) वृक्षाः

<u>खण्ड - ख रचनात्मक-कार्यम् (15 अङ्काः)</u>

**2.** पत्रं च पुनः उत्तरपुस्तिकायां लिखतु-    **½ x10= 5**

1. रमेश !
2. विद्यालये
3. आयोजितम्
4. अभ्यासम्
5. मञ्चनम्
6. अभिनयम्
7. करतलध्वनिम्
8. वदामि

9. करोतु
10. प्रति

3. चित्रं दृष्ट्वा मञ्जूषा-प्रदत्त-शब्द-सहायतया पञ्च वाक्यानि लिखत - 1x5=5

(i) एतत् उद्यानस्य चित्रम् अस्ति।

(ii) उपवने बालकाः बालिकाः च क्रीडन्ति |

(iii) एका बालिका चित्रं रचयति |

(iv) द्वौ बालकौ दोलायाम् खेलतः |

(v) माता बालकान् पश्यति |

अथवा

अनुच्छेदं लेखनम् (वर्षाकाल:)

(i) वर्षाकाले कृषका: कृषिकार्याणि कुर्वन्ति।

(ii) आकाशः कृष्णमेघैः आच्छादितः अस्ति।

(iii) बालिका: दोलायाम् दोलयन्ति।

(iv) सर्वे बालकाः आनन्दम् अनुभवन्ति।

(v) सर्वत्र उल्लासस्य वातावरणं दृश्यते।

4. अधोलिखितानि वाक्यानि संस्कृतभाषायां लिखत - 1x5=5

(i) अस्माकं विद्यालये वार्षिकोत्सव: अस्ति |

(ii) त्वं स्व गृह कार्यं कदा करिष्यसि ?

(iii) गंगाया जलं पवित्रं भवति |

(iv) ता: बालिका: संस्कृतं वदन्ति |

(v) सूर्यं पूर्वदिशायां उदेति |

<u>खण्ड - ग अनुप्रयुक्त-व्याकरणम् (25 अङ्का:)</u>

5. सन्धिं सन्धिविच्छेदं वा कुरुत- 1×4=4

(i) जगन्नाथ:

(ii) वाक् + ईश:

(iii) जगत + ईश्वर:

(iv) मृगाश्चरन्ति

6. समासं विग्रहं वा चिनुत- 1×4=4

(i) आ.रामः च कृष्णः च

(ii) आ. देवानां गतिः

(iii) अ. लम्बोदरः

(iv) अ. उपनेत्रम्

7. प्रकृति- प्रत्ययौ संयोज्य विभज्य वा उचितं उत्तरम् चिनुत- 1×4=4

( I) (घ) महा + त्वम्

(ii) (ख)गुणवान्

(iii) (ख) चतुरा

(iv) (घ) वीरत्व

8. वाच्यस्य नियमानुसारम् उचितं विकल्पं चिनुत- 1×3=3

(i) (क) धावकै: धाव्यते

(ii) (ग) सेवकेन नृपः रक्ष्यते

(iii) (ग) स: दुर्वचनं कथयति

9. संस्कृते समयं लिखत- 1×4=4

(i) पञ्च

(ii) सार्धनव

(iii) पादोनपञ्च

(iv) सपाद दश

10. उचित अव्यय पदं चिनुत- 1×3=3

(I) सहसा

(ii) नूनम्

(iii) इतस्ततः

11. अधोलिखितवाक्येषु रेखाङ्कितपदं अशुद्धं अस्ति, शुद्धं पदं विकल्पेभ्यः चिनुत- 1×3=3

(I) (ग) चत्वारः

(ii) (घ) वृक्षाः

(iii) (ख) पठामि

## खण्डः 'घ'- पठितावबोधनम् (30 अङ्काः)

12. अधोलिखित गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

I. एकपदेन उत्तरत- ½×2=1

(i) घटनायाः

(ii) आरक्षिणि

II. पूर्णवाक्येन उत्तरत- 1×2=2

(i) आश्चर्यमघटत् सः शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्

(ii) न्यायाधीशः कारादण्डमादिश्य इति निर्णयम् श्रुतवान्

III. भाषिककार्यम् 1×2=2

I.

II.

13. अधोलिखित पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

I. एकपदेन उत्तरत- ½×2=1

(i) फलच्छायासमन्वितः

(ii) फलच्छायासमन्वितः

II. पूर्णवाक्येन उत्तरत- 1×2=2

(i) महावृक्षेषु दैवात् फलं नास्ति तथापि छायां निवार्यते

(ii) सेवितव्यो महावृक्षः फलच्छायासमन्वितः

III. भाषिककार्यम् – 1×2 = 2

i वृक्षः

ii महावृक्षः

14. अधोलिखित नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5

अ) एकपदेन उत्तरत – ½×2=1

(I) काकः (II) काकस्य |

आ) पूर्णवाक्येन उत्तरत – 1×2=2

(I) अनृतं वदसि चेत् काकः दशेत्

(II) काकः स्वविषये कथयति - काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते |

इ भाषिकाकार्यम् - 1 x 2 =2

(i) जल्पसि (ii) कृष्णः

15. प्रश्न-निर्माणं कुरुत- 1×4 =4

(i) कस्मै ?

(ii) कुत्र ?

(iii) कौ ?

(iv) कुत्र ?

16. अधोलिखितश्लोकानाम् अन्वयं मञ्जूषातः उचितं पदं चित्वा पूरयत- 1×4 =4

अन्वयः - (i) बुद्धेः (ii) भयात् (iii) बुद्धिमान् (iv)उपयोगं |

17. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत- ½×8=4

i बुद्धिमती पुत्रद्वयेन उपेता पितृगृहं प्रति चलिता ।

ii मोर्गे सा एकं व्याघ्रम् अपश्यत्।

iii व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच - अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्

iv व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

v जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

vi प्रत्युत्पन्नमतिः सा शृगालं आक्षिपन्ती उवाच।

vii 'त्वं व्याघ्रत्रयम् आनेतुं' प्रतिज्ञाय एकमेव आनीतवान् ।

viii गलबद्ध शृगालकः व्याघ्रः पुनः पलायितः

18. अधोलिखितपदेषु रेखाङ्कितपदानां प्रसंगानुकुलं उचितं अर्थं चिनुत- 1×3=3

(I) कठिनम्　　　　(ii) जलैः　　　　(iii) सरलता

केन्द्रीय विद्यालय संगठन, पटना सम्भाग (पटना)

कक्षा : दशमी

समय - त्रय होरा:　　　　विषय - संस्कृतम्　　　　पूर्णांक - **80**

---

प्रश्नपत्रस्वरूपम् –

| | | |
|---|---|---|
| 'क' खण्डः | : अपठितावबोधनम् - | **10** अङ्काः |
| 'ख' खण्डः | : रचनात्मककार्यम् - | **15** अङ्काः |
| 'ग' खण्डः | : अनुप्रयुक्तव्याकरणम्- | **25** अङ्काः |
| 'घ' खण्डः | : पठितावबोधनम् - | **30** अङ्काः |

---

<u>खण्ड - क अपठित गद्यांश - **10** अड्का:</u>

**1. I.** एकपदेन उत्तरत –　　　　**(1x2=2)**

(i) संगणकयन्त्रस्य |

(ii) नवीनैः |

**II.**पूर्णवाक्येन उत्तरत –　　　　**2x2=4**

(i) कृमिप्रवेशेन (**VIRUS**) संगणकयन्त्रं दोषपूर्णं भवति |

(ii) जनानां मष्तिष्के विचाराः स्मृतिरूपेण स्थाप्यन्ते |

**III.**संगणकयुगम्

**IV.**यथानिर्देशम्उत्तरत –　　　　**1x3=3**

(i) (ख) संगणकयन्त्रम्

(ii) (क) नूतनम्

(iii) (ख)नूतनं

<u>खण्ड - ख रचनात्मक-कार्यम् (**15** अङ्का:)</u>

**2.** पत्रं च पुनः उत्तरपुस्तिकायां लिखतु-　　　　**½ x10= 5**

1. दिल्ली
2. प्रियअग्रज
3. कुशलं
4. स्मरतः
5. आगमिष्यति
6. अवश्यम्
7. लेखिष्यति
8. सम्यक्
9. कुशली
10. अनुजः

**3.** चित्रं दृष्ट्वा मञ्जूषा-प्रदत्त-शब्द-सहायतया पञ्च वाक्यानि लिखत - **1x5=5**

**(i)** एतत् उपवनस्य चित्रम् अस्ति।

**(ii)** उपवने बालकाः बालिकाः च क्रीडन्ति **|**

**(iii)** उद्याने बहवः वृक्षाः सन्ति **|**

**(iv)** उद्याने शिशवः इतस्ततः भ्रमन्ति **|**

**(v)** बालकेन सह शिशवः क्रीडन्ति **|**

अथवा

अनुच्छेदं लेखनम्

**(i)** विद्या विनयं ददाति।

**(ii)** मानवस्य ज्ञानम् एव विकासयति।

**(iii)** विद्याधनं प्रधानधनम् वर्तते।

**(iv)** लोके विद्याविहीनः पशुः कथ्यते।

**(v)** लोके विद्यायाः आवश्यकता भवति।

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषायां लिखत - **1x5=5**

**(i)** बालकः उपवनं गच्छति **|**

**(ii)** श्यामा पाठं पठति **|**

(iii) उज्ज्वलः कुत्र गच्छति ?

(iv)कमला कुत्र अगच्छत् ?

(v) ऋतुराजः श्वः प्रयागं गमिष्यति ?

## खण्ड - ग अनुप्रयुक्त-व्याकरणम् (25 अङ्का:)

5. सन्धिं सन्धिविच्छेदं वा कुरुत- 1×4=4

(i) चलत् + अनिशम्

(ii) व्याघ्र: + अपि ।

(iii) मूर्खा + च

(iv) स्यात् + न

6. समासं विग्रहं वा चिनुत- 1×4=4

(i) ग) मलेन सहितम्

(ii) ग) राजपुत्र:

(iii) (क) पिक: च काक: च

(iv) ( ख) विघ्नानाम् अभाव

7. प्रकृति- प्रत्ययौ संयोज्य विभज्य वा उचितं उत्तरम् चिनुत- 1×4=4

( I) (ख) रमणीय+ टाप्

(ii) (ग) बुद्धि+ मतुप्

(iii) सम+त्व

(iv) क) धूर्ता

8. वाच्यस्य नियमानुसारम् उचितं विकल्पं चिनुत- 1×3=3

(i) (ग) चलामि

(ii) (ख) क्रियते

(iii) (क) चीयन्ते

9. संस्कृते समयं लिखत- 1×4=4

(i) सार्धपञ्चवादने

(ii) विंशति न्यूनचतुर्वादने

(iii) सप्तवादने

(iv) पादोनसप्तवादने

10. उचित अव्यय पदं चिनुत- 1×3=3

(I) उच्चैः

(ii) शनैः

(iii) विना

11. अधोलिखितवाक्येषु रेखाङ्कितपदं अशुद्धं अस्ति, शुद्धं पदं विकल्पेभ्यः चिनुत- 1×3=3

(I) (ख) पठन्ति

(ii) (ग) इमानि

(iii) (ख) चौरात्

## खण्डः 'घ'- पठितावबोधनम् (30 अङ्काः)

12. अधोलिखित गद्याशं, पद्याशं नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

I. एकपदेन उत्तरत- ½×2=1

(i) चौरः

(ii) पादध्वनिना

II. पूर्णवाक्येन उत्तरत- 1×2=2

(i) ग्रामवासिनः स्वगृहात् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्।

(ii)वस्तुतः चौरः आरक्षी एव आसीत् |

III. भाषिककार्यम् 1×2=2

I. चौरः

II. आसीत् |

13. अधोलिखित पद्याशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

I. एकपदेन उत्तरत- ½×2=1

(i) शतशकटीयानम् ।

(ii) ध्वानम्।

II. पूर्णवाक्येन उत्तरत- 1×2=2

(i) यानानां पङ्कतयो ह्यनन्ता: सन्ति अत एव संसरणम् कठिनं भवति?

(ii) वाष्पयानमाला |

III. भाषिककार्यम् – 1×2 = 2

i शतम्

ii संसरणम्

14. अधोलिखित नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5

अ) एकपदेन उत्तरत – ½×2=1

(I) काक: (II) काक: |

आ) पूर्णवाक्येन उत्तरत – 1×2=2

(I) काकानां सत्यप्रियता जनानां कृते उदाहरणस्वरूपा |

(II) पिकस्य वर्णः कृष्ण: भवति |

इ भाषिकाकार्यम् - 1 x 2 =2

(i) मन्यते (ii) प्रथितम् |

15. प्रश्न-निर्माणं कुरुत- 1×4 =4

(i) कुत्र ?

(ii) केन ?

(iii) कस्या: ?

(iv) कदा ?

16. अधोलिखितश्लोकानाम् अन्वयं मञ्जूषातः उचितं पदं चित्वा पूरयत- 1×4 =4

अन्वयः - (i) पुत्रसहस्त्रम् (ii) सममेव (iii) पुत्रस्य (iv) अभ्यधिका |

अथवा

मञ्जूषाया:साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः: लिखत-

भावार्थः- **(i)** कल्याणम् **(ii)** अहितकरम् **(iii)** कूपम् **iv)** परेषाम् |

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत- **½×8=4**

**i** अस्ति देउलाख्यो नाम ग्रामः।

**ii** तस्य भार्या बुद्धिमती आसीत्।

**iii** राजसिंहः नाम राजपुत्रः वसति स्म।

**iv** सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

**v** मार्गे सा एकं व्याघ्रं ददर्श।

**vi** सा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्या जगाद।

**vii** बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

**viii** बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।

**18.** अधोलिखितपदेषु रेखाङ्कितपदानां प्रसंगानुकुलं उचितं अर्थं चिनुत- **1×3=3**

**(I)** ख) मूर्ख: **(ii)** ग) मार्गे **(iii)** क) सत्यम्_

**********************************************